।।श्री।।

नारायणप्रणीतः

तन्त्रसमुच्चयः

शङ्करप्रणीतया विमर्शिन्याख्यया नारायण-
शिष्यप्रणीतया विवरणाख्यया
व्याख्यया च समेतः।

श्रीमद् षड्गुणसम्भृतं वपुरधिष्ठायानुगृह्णाति यः
श्रद्धाभक्तिपवित्रितोपहरणैः स्वारम्भभूतात्मकैः।
पूर्णानन्दरसानुभूरपि सदा सन्तर्पितो यज्वन-
स्तं देवं निगमागमाद्यधिगतं नित्यं समाराध्नुयाम्।।१।।

विमर्शिनी।

हरीशेशहरिस्कन्ददुर्गार्यगणपात्मना।
मूर्तिभेदेन पूज्याय नमोऽस्तु परमात्मने।।

Shripuram Publications
www.shripuram.org

अथ खलु नारायणाख्यः परमपुरुषः स्वस्वागमेषु पृथक् पृथगवस्थितं तन्त्रं तत्कर्तॄणां युगपदेवावगमनायैकत्रैव समुच्चिचीषया तन्त्रसमुच्चयाख्यं ग्रन्थं कर्तुकामः प्रथमतस्तदविघ्नेन परिसमाप्त्यादिप्रयोजनाय स्वबुद्धाववस्थितानां सप्तानामपि देवतानां कारणात्मिकां परदेवतामुद्दिश्य स्वस्यैव तदाराधनस्य परमपुरुषार्थत्वं मन्यमानो विषयादिकमप्यर्थात् सूचयन् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति प्रसिद्धस्याशीर्वादस्य ग्रन्थारम्भयोग्यत्वादाशिषं प्रयुङ्क्ते - श्रीमदित्यादिना। तं देवं नित्यं समाराध्नुयामिति सम्बन्धः। देवो द्योतनात्मकः परमात्मा[१]। तच्छब्दस्य यो यज्वनोऽनुगृह्णाति, तमिति पूर्ववाक्येन सम्बन्धः। नित्यं नैरन्तर्ययुक्तं यथा भवति तथेति क्रियाविशेषणम्। समाराधनं समीचीना पूजा। पूजायाः सम्यक्त्वं नामात्मद्रव्यदेवतानामैक्यम्। तदिह प्रार्थनीयमित्याशिषोऽर्थवत्त्वम्। ननु केन प्रमाणेन देवस्यास्तित्वं कल्प्यत इत्यत्राह - निगमागमाद्यधिगतमिति। निगम्यन्ते स्थिरीक्रियन्तेऽर्था एभिरिति निगमा वेदाः। आगमा विष्णुसंहितादयः। आदिशब्देन पुराणादय उक्ताः। तेषु निगमागमपुराणादिषु, व्याप्तमित्यर्थः। आराधनफलमनुवादरूपेणाह - यो यज्वनोऽनुगृह्णातीति। यज्वनः यष्टॄन्। 'यज्वा तु विधिनेष्टवानि'त्यमरः। ईश्वरस्यानुग्रहो नाम साधकं प्रति स्वतादात्म्यपर्यन्ता प्रीतिः। तथाहि विष्णुसंहितायां - "भक्त्यैव परया तुष्टो देवदेवः स योगिनाम्। पूजाद्यनुग्रहायादौ रूप भेजे चतुर्भुजम्।।" इति। ननु कथंभूतोऽनुगृह्णातीत्यत्राह - सन्तर्पित इति। यज्वभिरिति शेषः। सन्तर्पितः सम्यक् प्रसादितः। ननु केन द्रव्येण प्रसादित इत्यत्राह - श्रद्धाभक्तिपवित्रितोपहरणैरिति। श्रद्धा विश्वासः, भक्ति स्नेहः विश्वासात्मको मानसो विकारः, ताभ्यां श्रद्धाभक्तिभ्यां पवित्रितैर्देवोपयोगयोग्यत्वं प्राप्तैरुपहरणैर्गन्धादिभिः। तेषामुपहरणानां स्वरूपमाह - स्वारम्भभूतात्मकैरिति। स्वस्य साधकस्यारम्भकाणि सम्भूतिकारणानि भूतानि पृथिव्यादीनि स्वरूपं येषामुपहरणानां ते तथोक्ताः। तत्र पृथिव्येव गन्धः, आकाश एव पुष्पं, वायुरेव धूपः, तेज एव दीपः, आप एव जलं निवेद्यं च। इति विभागः। ननु तैरुपहरणैः सन्तर्पितोऽपि कथमनुगृह्णातीत्यत्राह - षड्गुणसम्भृतं[२] वपुरधिष्ठायेति। षड्भिर्गुणैः सम्भृतं षड्गुणसम्भृतम्। गुणाः सर्वज्ञतादयः। "ज्ञानसन्तोषनित्यत्वस्वातन्त्र्याविघ्नवैभवैः। हृदयादिगुणैर्युक्तः सकलोऽनुग्रहादिकृत्।।" इत्यादिभिर्गुणानां षडङ्गत्वेनागमेषु प्रसिद्धत्वात्। तैः षड्भिर्गुणैः सम्भृतं संगृहीतम्। वपुः विग्रहम्। अधिष्ठाय आश्रित्य। तच्च वपुः श्रीमच्च अतिशयेन कान्तिमत्,

---

१. 'त्मा। यो', २. 'तं गुणाः' ग. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

नास्मदादिशरीरवज्जडमित्यर्थः। ननु कथं सर्वकारणभूतस्य देवस्य परिच्छिन्नैरुपहरणैस्तृप्तिरित्यत्राह - सदा पूर्णानन्दरसानुभूरपीति। पूर्णोऽखण्डः आनन्दमयो रसः आनन्दरसः, पूर्णमानन्दरसमनुभवतीति पूर्णानन्दरसानुभूः सदेत्यनेन पूर्णानन्दरसानुभवस्य नैरन्तर्यमुच्यते। अपिशब्दो विरोधे। सदा पूर्णानन्दरसानुभूरपि कदाचिद्यज्वभिर्दत्तैरल्पैरुपहारैः सन्तर्पितस्ताननुगृह्णातीति परमेश्वरस्वभावस्यापरिमेयत्वं द्योत्यते। अत्रादौ श्रीमदिति श्रीशब्दप्रयोगेणैवास्मिन् ग्रन्थे सर्वमङ्गलानां सन्दोहो भवतीत्यपि[१] ग्रन्थकृता विवक्षितम्। देवमाराध्नुयामित्यनेन वाक्येन देवाराधनप्रतिपादनमस्य ग्रन्थस्य विषय इति सूचितम्। अनुगृह्णातीति पदेन देवानुग्रह एवात्र प्रयोजनमित्यपि सूचितम्। यज्वन इति पदेनाधिकारिणः सूचिताः। सम्बन्धश्च प्रतिपादकस्य[२] ग्रन्थस्य प्रतिपाद्यस्य तन्त्रस्य चाभिधानाभिधेयभावः सूचितः।।१।।

विवरणम्।

नमो हरिहराद्याख्यजगद्विख्यातमूर्तये।
देवायार्चयमानेभ्यो भोगानुग्रहदायिने।।१।।
गुरून् गणाधिराजं च नत्वा गुरुनिदेशतः।
तत्कृतं विर्वरिष्यामः स्फुटं तन्त्रसमुच्चयम्।।२।।

ग्रन्थारम्भे समुचितं मङ्गलाचरणमर्थाद्विषयादिप्रतिपादनं च करोति- श्रीमत् षड्गुणसम्भृतमिति। श्रीशब्दारम्भो मङ्गलप्रकर्षार्थ एव। तं देवं नित्यं समाराध्नुयामिति सम्बन्धः। नित्याराधनेयमर्थ्यते। तस्याः सुकरत्वेऽपि बाह्याभ्यन्तराणां तत्साधनानां बहुतरत्वात् तेषां च प्रायो दुस्संपादनत्वात् तदर्थनोपपत्तिः। ननु कीदृशमेतत् समाराधनं, किं वा तत्फलमिति तत् सर्वं तमेव देवं स्तुवन् दर्शयति - श्रद्धाभक्तिपवित्रितोपहरणैः सन्तर्पितो यो यज्वनोऽनुगृह्णातीति। जलगन्धादीनि समाराधनद्रव्याण्युपहरणानि, तानि च यज्वनामेव श्रद्धाभक्तिभ्यां पवित्रितानि। समाराधने श्रद्धा देवे च भक्तिः ताभ्यां पवित्रितानि परिशुद्धतां गमितानि, तैरुपहरणैः सन्तर्पितस्तैरेव यज्वभिस्सन्तृप्तिं प्रापितस्सन्,ताननुगृह्णाति। विविधोपभोगसिद्धिसालोक्यादिपूर्वकपरमकैवल्यलक्षणो यथाधिकारमनुग्रहः, तेनानुग्रहेण (यो): योजयति तं देवमिति सम्बन्धः। जलगन्धादिभिर्देवस्य सन्तर्पणरूपं समाराधनमनुग्रहश्च तस्य फलमिति भावः। जलादिद्रव्याणां स्वतो न परिशुद्धिस्तदभावो

---

१. 'त्वि', २. 'स्य प्र' ग. पाठः

Shripuram Publications
www.shripuram.org

वा। किन्तु तानि श्रद्धाभक्तिपूर्वकं देवे विनियुज्यमानान्यपूर्वां परिशुद्धिमपि प्राप्तानि भवन्ति। यद्वा पूर्वं परिशुद्धानामपि पवित्रितत्वं तद्गतरसादीनां भूमापत्तिनिबन्धनं संस्कारान्तरम्। नैतान्युपहरणानि लौकिकजलगन्धाद्यर्थमात्राणीत्यपि दर्शयति - स्वारम्भभूतात्मकैरिति। स्वे आरम्भान्निजनिजोपादानानि पञ्चभूतानि तैस्समाविष्टतया तदात्मकैरुपहरणैः। तदुक्तम् - "पञ्चीकृतमहाभूतपञ्चकं कारणान्वितम्। सपर्यावस्तु निर्दिष्टम्" इति। भूतशब्देन चेह व्यष्टिसष्टिकारणावस्थानां पञ्चभूतानां ग्रहणम्। तदप्युक्तम्।

"व्यष्ट्या चापि समष्ट्या च भूतानामीशयायिनाम्।
कारणेनापि सम्भेदाद् रसस्तु त्रिविधो मतः।।"

इति। कथमेभिर्देवस्य सन्तृप्तिसम्भव इति। स्वारम्भभूतात्मकैः। आरम्भा इह कार्याणि। शोभना आरम्भा येषामिति स्वारम्भाणि, तान्येव व्यष्ट्याज्यवस्थानि पञ्चभूतानि तदात्मकैः। जलगन्धादिगतभूतकार्याणां शोभनत्वं रसात्मकत्वम्। तदुक्तम् - 'तत्राभिव्यक्तरूपाणाम्' इत्यादि। रसयोगात् तु जलगन्धादिभिः स्वकारणयोगिभिरपि देवसन्तृ(प्ति? प्त्यु)पपत्तिभावः। रसस्य च भूतव्यष्ट्याद्यन्वयतः स्वरूपभेदः। तदप्युक्तम् - 'स पुनस्त्रिविधो रस' इत्यादि। प्रतिपत्तिविशेषमप्यु(प)हरणेषूपदिशति - स्वारम्भभूतात्मकैरिति। स्वशब्देनेह यज्वसम्बन्धिनां ग्रहणम्। पञ्चभूतारब्धानि हि साधकानां सभोग्यार्थजातानि शरीराणि। वक्ष्यति च - "भूतानि पञ्च परमात्मनि"त्यादि। तदात्मनां तेषां यज्वनां निजनिजारम्भकपञ्चभूतात्मकैरुपहरणैः जलगन्धाद्युपहरणसमर्पण-विधौ तद्द्वारा देवे स्वकीयकृत्स्नसमर्पणमेव यंज्वभिरवहितैर(नु)सन्धेयमिति भावः। जलगन्धादिसमर्पणयोग्यतामपि देवस्याह - वपुरधिष्ठायेति। जलगन्धादिग्रहणोचितैः रसनाघ्राणाद्यखिलकरणैः सहितं मन्त्रमयविग्रहं तदभिमान्यात्मतयाविश्य तत्स्वामितया तत्रावस्थायेत्यर्थः। उपहरणैस्सन्तर्पितोऽनुगृह्णातीति सम्बध्यते। समाराधनसम्बन्ध-मप्युपदिशति - सदापि पूर्णानन्दरसानुभूरिति। तत्कालविशेषणं चैतत्-सदापीति। स्थूलात्मनि जलगन्धादिमयसमरससमर्पणसमये सूक्ष्मात्मनि तत्समष्टिमयामृतसमर्पणसमये परात्मनि तत्कारणमयप्रकृतिसमर्पणसमयेऽपीत्यर्थः। वक्ष्यति च - "स्थूलात्मतोन्मेषविधायिके"त्यादि। पूर्णमानन्दरसमनुभवतीति पूर्णानन्दरसानुभूः। आनन्द इह देवस्य स्वरूपानन्द एव। रसश्च यथासमर्पणं रसामृतप्रकृतिलक्षणः। तयोः सामानाधिकरण्येनोभयोरेकतादात्म्यलक्षणः

Shripuram Publications
www.shripuram.org

सम्बन्धः। रसादीनां यावद् यज्वाभिप्रैति देवो वा तावान् भूमा भवतीति तस्य पूर्णविशेषणम्। तदुक्तम् - 'रसं ब्रह्माण्डसम्मितम्" इति। एतदर्थमेव च दर्शितं पवित्रिताभिधानं समाराधनविधौ। व्यष्ट्यादिभूतात्मकस्य रसादेः स्थूलात्मादिना तादात्म्यमापादनीयमित्येतदपीहोक्तम्। नन्वेवमाहार्यसन्तृप्तेरपरिपूर्णस्यास्य परानुग्रहायोग इति। नेत्याह - सदा पूर्णानन्दरसानुभूरपीति। सदेति। समाराधनावस्थायामवस्थान्तरेष्वपीत्यर्थः। पूर्णानन्दः स्वरूपानन्द एव। स च चरमः फलरूपो रसः। उपहरणरसा हि क्रमोत्कर्षिणो मायीया एव। स्वरूपानन्दस्तु नित्योऽकृत्रिमो रसः। तस्य देशकालाद्यनवच्छिन्नत्वाद् घनत्वाच्च पूर्णत्वम्। तदनुभूरपि सन्नित्यर्थः। ननु यद्येवं पूर्णानन्दरसानुभूर्देवः, तदा कथमस्य समाराध्यताद्युपपत्तिरित्यत आह - श्रीमत्षड्गुणसम्भृतं वपुरधिष्ठायेति। देवस्यैव स्वस्वरूपाव्यतिरिक्ता शक्तिरिह श्रीर्व्यपदिश्यते। सैव मायाप्रकृतिः। तदवान्तरशक्तयो ज्ञानैश्वर्यादयः। ताश्च समुचितानुग्रहादिकार्यविषयतया प्रधानस्य देवात्मतत्त्वस्य तदुपकारितया षड्गुणा षड् वाङ्गानि। यद्वा कल्याणस्वभावतया षड्गुणा एव, तैः श्रीसमन्वयतन्त्रीमद्भिः षड्गुणैः सम्भृतं हृदयाद्यवयवसम्भवक्रमेण उपकल्पितं वपुरधिष्ठायेति। देवस्य स्वरूपानन्दनिर्वृतत्वेऽपि सकलानुग्रहादिकरशक्तियोगतः समारा(ध्यादु ? ध्यताद्यु)पपत्तिरिति भावः। श्रीमदिति पृथग्वा पदम्। श्रीशब्देन तद्वपुषः स्वाभाविकी भूषणादिप्रभवा च शोभा गृह्यते। स्वोक्तेऽर्थे प्रमाणमपि वदन् वेदानुसारितामप्यस्य समाराधनस्य दर्शयति - निगमागमाद्यधिगतमिति। निगमो वेदः। आगमश्च विष्णुसंहितादितन्त्रम्। सदाचारादेरादिशब्देन ग्रहणम्। परदेवतानुस्मरणमाशीर्लक्षणं च मङ्गलाचरणमेवं कृतम्। परदेवतायाः समाराधनोचिततयानुस्मरणात् तत्समाराधनार्थनायाश्च अस्य समुचितत्वम्। किञ्च परदेवतात एवेयमर्थनार्थतो भवति। ततश्च अर्थनयैव सपरिकरसमाराधनसम्पत्तौ तदन्यतमस्यापि समाराधनक्रमगुणनिकासाधनस्यास्य ग्रन्थस्याविघ्नेन परिसमाप्त्याद्यपि लभ्यत इति। इह सपरिकरं समाराधनं विषयः। तत्साध्योऽनुग्रहश्च प्रयोजनमिति च अर्थात् प्रतिपादितम्। किञ्च षड्गुणसम्भृतं वपुरिति भूसंस्कारादिपूर्वकमाधारशिलादिस्तूप्यन्तप्रासादवपुषो ब्रह्मशिलाद्याधेयप्रतिमावपु(ष)श्च विरचनमपि सूचितम्। वपुरधिष्ठायेति तयोः स्वोचितसंस्कारादिपूर्वकं प्रतिष्ठापनं वाहनादि सर्वं सूचितम्। श्रद्धाभक्तिपवित्रितोपहरणैः सन्तर्पित इति समाराधनोत्सवौ। श्रीमदिति स्नापनं प्रायश्चित्तजीर्णोद्धारौ च। वक्ष्यति च - 'विशुद्धिसान्निध्यसमृद्धिकारकम्' इति।

Shripuram Publications
www.shripuram.org

बिम्बादेरशुद्धिजीर्त्यादिपरिहृतिरपि पुनश्शोभाहेतुर्भवति। कुण्डमण्डलादिलक्षणं तु इहैवान्तर्भूतमिति प्रतिपाद्यभेदा इहैव सूचिता इति।।१।।

गुरुदिवाकरभद्रकटाक्षरुक्-
स्फुरितहृत्कमलोदरसम्भृतम्।
लिखितयाम्यथ तन्त्रसमुच्चयं
गुणनिकाविधिसाधनसिद्धये।।२।।

विमर्शिनी

एवमाशीर्वाद[1]रूपमङ्गलाचरणं कृत्वा गुरुस्मरणपूर्वकं ग्रन्थमारभते - गुरुदिवाकरेति। अथ गुणनिकाविधिसाधनसिद्धये तन्त्रसमुच्चयं लिखितयामि। अथेत्याशीर्वचनानन्तरम्। सकृद् गृहीताया विद्यायाः पुनरभ्यासो गुणनिका, गुणनिकैव विधिर्गुणनिकाविधिः, विधिः क[2]रणं, तस्य साधनसिद्धये साधनपरिग्रहाय। तन्त्रसमुच्चयं तन्त्राणां समुच्चयरूपत्वात् तन्नामकं ग्रन्थम्। लिखितयामि लिखितं करोमि, पुस्तकस्थं करोमि। ननु कथम्भूतं तन्त्रसमुच्चयमित्यत्राह - गुरुदिवाकरभद्रकटाक्षरुक्स्फुरितहृत्कमलोदरसम्भृतमिति। गु[3]रुरेव दिवाकरो गुरुदिवाकरः सूर्यः, तस्य भद्राः प्रसादयुक्ताः कटाक्षा एव रुचो रश्मयस्तैः स्फुरितस्य विकसितस्य हृदयकमलस्योदरेऽन्तर्भागे सम्भृतं संगृहीतम्। यथा दिवाकररश्मिभिः कमलानि विकसन्ति, तथा गुरोः प्रसादयुक्तैः कटाक्षरश्मिभिर्हृदयकमलस्य विकासनं सञ्जातमिति रूपकालङ्कारच्छलेन स्वगुरोर्दिवाकरनामत्वमपि सूचितम्।।२।।

विवरणम्

मङ्गलाचरणेनाविघ्नसम्पत्तौ विषयादिप्रतिपादनेन श्रोतुः सपरिकरसमाराधनप्रतिपित्सोपपत्तौ च बाह्यं तत्प्रतिपादनप्रकारं तदुचितग्रन्थकरणे प्रतिज्ञानेन वदन् तदीयं प्रयोजनमपि दर्शयति - गुरुदिवाकरेति। अथ तन्त्रसमुच्चयं लिखितयामि इत्यन्वयः। तन्त्राणां वैष्णवशैवादीनां तद्भेदानां च विष्णुसंहितादीनाम् अर्थात् प्रतिष्ठासमाराधनाद्यर्थं समुच्चयस्तन्त्रसमुच्चयस्तम्। लिखितयामि लिखितं करोमि। पुस्तके विनिवेशयामीति यावत्। गुरुरेव दिवाकरो गुरुदिवाकरः तस्य भद्रास्सन्तः कटाक्षा एव रुचो रश्मयः ताभिः स्फुरितं विकसितं हृत्कमलं तदुदरे सम्भृतम्। सकलतन्त्रतो यथोपदेशमावश्यकमशेष-

---

१. 'दम' ग. पाठः, २. 'का' ख. पाठः, ३. 'रोर्दिवाकरभद्रस्य कटाक्षस्य रश्मिभिः स्फु' ग. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

मुपादायोपकल्पितमिति। नानातन्त्रगतस्य सपरिकरस्य समाराधनस्य तेषाम् अर्थतः समुच्चयेन इदं प्रतिपादनमिति बाह्यः प्रतिपादनप्रकारोऽप्युक्तः। तथाप्रतिपादनं च लघुप्रयत्नेन प्रतिपत्त्यार्थात् सिद्धमेव। लिखितयामीति तथाग्रन्थकरणमुक्तम्। तत्प्रयोजनमुच्यते - गुणनिकाविधीति। गुरोः सकाशात् सकृत् प्रतिपन्नस्यार्थस्य स्थैर्यसिद्धये पुनः पुनरनुसन्धानरूपोऽभ्यासो गुणनिका, तस्यां विधिर्विधानं करणं तस्य साधनमुपाय आश्रयः तस्य सिद्धय इति। ग्रन्थद्वारा हि क्रियमाणा गुणनिका निरुपप्लवेति भावः। तदेतत् स्वं प्रयोजनं परार्थं चैतद्ग्रन्थकरणम्। ततश्च तदीयं प्रयोजनमप्येतत्। अत्र च गुरुदिवाकरेति दिवाकरो नाम निजगुरुः, तथा रविर्नाम स्वपिता च परिगृह्यते। ततश्च प्रकरणारम्भे परदेवानुस्मरणानन्तरं स्वगुर्वनुस्मरणमपि कृतमिति।।२।।

श्रीशेशसेशहरिसुम्भजिदाम्बिकेय-
विघ्नेशभूतपतिनामविभिन्नभूम्नः।
वक्ष्ये परस्य पुरुषस्य समानरूप-
मर्चाविधिं सह पृथक् च विशेषयुक्तम्।।३।।

विमर्शिनी

अथ चिकीर्षितग्रन्थस्य देवतानियमादिकमाह - श्रीशेशेति। श्रीशेशसेशहरिसुम्भजिदाम्बिकेयविघ्नेशभूतपतिनामविभिन्नभूम्नः, श्रीशो विष्णुः, ईशः शिवः सेशहरिः शिवनारायणः, सुम्भजिद् दुर्गा, आम्बिकेयः स्कन्दः, विघ्नेशो गणपतिः, भूतपतिः शास्ता, एतैर्नामभिरेव विभिन्नं विशेषतः पृथग्भूतं भूमा महत्त्वं यस्य तस्य। परस्य पुरुषस्य परमात्मनः, अर्चाविधिं पूजाविधानं वक्ष्ये। अर्चाविधिमित्यनेन भूपरिग्रहादितीर्थस्नानपर्यन्तं कर्म विवक्ष्यते। तत्र समानरूपम् एकप्रकारेण स्थितम् अर्चाविधिम्। सह एकरूपत्वेन। विशेषयुक्तं विशेषसहितम्। पृथक् च विभागेन।।३।।

विवरणम्

ननु यद्यप्ययं तन्त्राणां समुच्चय आरभ्यते तथापि किंवपुषो देवस्येदं सपरिकरं समाराधनं, कथं वा अनेन समुच्चयेनापि तत्प्रतिपादनमित्यपेक्षया तत्सर्वं तन्त्रसमुच्चयप्रकारप्रतिज्ञानेन दर्शयति - श्रीशेति। श्रीशो विष्णुः, ईशः शिवः, सेशहरिः शङ्करनारायणः,

www.shripuram.org
Shripuram Publications
www.shripuram.org

सुम्भजिद् दुर्गा, आम्बिकेयः सुब्रह्मण्यः, विघ्नेशो गणपतिः, भूतपतिश्शास्ता, श्रीशादिसप्तनामभिर्विभिन्नो विष्ण्वादिमूर्त्तिरूपभेदतो विभक्तो भूमा स्वतोऽनवच्छिन्नमपि महत्स्वरूपं यस्य स तथोक्तः। विष्ण्वादिवपुषः सप्तात्मकस्य देवस्येदं प्रतिष्ठादिपूर्वकं समाराधनमिति भावः। परस्य पुरुषस्येति। तं देवमिति प्रकृतस्येति भावः। समान-रूपमर्चाविधिं सहेति। अर्चा प्रतिमा समाराधनं वा, तद्विषयं सर्वमपि समानरूपमेकतया वक्ष्ये इति। यथा - स्नात्वाचम्याथ देवालयगुरुनिलयादाविति, क्षेत्रे वारिधिवर्गकोष्ठसुविचित्र इति। विशेषयुक्तमर्चाविधिं पृथक् (च)। चेन समुच्चयेन क्वचित् क्वचिद्विशेषोऽप्युक्तः। यथा - विष्णौ माषपयोऽधिकं स्मृतमिहार्घ्यमिति, शाङ्र्गीशदुर्गाजिते बीजौघ इति। अयमिहाभ्यन्तरः सपरिकरसमाराधनप्रकार इति।।३।।

वर्णाश्रमाधिकृतकर्मरतस्तदुक्त-
न्यायात्तवित्तनिचयः परमस्य पुंसः।
नित्यार्चनादिविधये प्रतिमाप्रतिष्ठा-
कर्मोन्मना गुरुवरं प्रथमं वृणीत।।४।।

विमर्शिनी

कर्तृनियमं वदन् गुरुवरणं प्रस्तौति - वर्णाश्रमेति। वर्णाश्रमाधिकृतां कर्मरतः ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणामधिकृतेषु विहितेषु कर्मसु रतः नित्योद्युक्तः। तदुक्तन्यायात्तवित्तनिचयः। तेषामुक्तेन न्यायेन ब्राह्मणानां याजनाध्यापनप्रतिग्रहैः, क्षत्रियाणां परिपालनादिभिः, वैश्यानां कृष्यादिभिः शूद्राणां त्रैवर्णिकशुश्रूषणेन इत्यादिन्यायेनात्तेन परिगृहीतेन वित्तनिचयेन धनसमुदायेन युक्तः। स्वाभीष्टदेवतात्मकस्य परमस्य पुंसः। नित्यार्चनादिविधये नित्यपूजोत्सवादिविधानाय। प्रतिमाप्रतिष्ठाकर्मोन्मनाः प्रतिमायाः प्रतिष्ठाकर्मण्युद्युक्तचेताः कर्ता। प्रथममादौ। गुरुवरं गुरुश्रेष्ठं वृणीत।।४।।

विवरणम्

अथ प्रथमं तावद् अर्चाविधावधिकारिविशेषं वदन् तदीयं प्रथमकर्तव्यमपि विधत्ते - वर्णाश्रमाधिकृतकर्मरत इति। ब्राह्मणादयो वर्णाः तेषु ब्रह्मचर्यादय आश्रमाः। वर्णग्रहणमनुलोमानां सूतकस्य चोपलक्षणार्थम्। तेष्वधिकृतानि कर्माणि सन्ध्योपासनाग्निहोत्रादीनि नित्यसमाराधनादीनि च श्रुतिस्मृत्यागमसिद्धानि तेषु रतः तात्पर्यप्रवृत्तः।

Shripuram Publications
www.shripuram.org

तेषां वर्णाश्रमाणां वृत्त्यर्थमुक्तेन न्यायेन आत्त आर्जितो वित्तनिचयो निजवृत्तिदेवप्रतिष्ठादि-पर्याप्तो येन स तथोक्तः। परमस्य पुंसो नित्यार्चनादिविधय इति। काम्यनैमित्तिकानामादि-शब्देन ग्रह(ण)म्। श्रीशेशादिवपुषः परस्य पुरुषस्येति प्रकरणाल्लभ्यते।।४।।

विप्रः कुलीनः कृतसंस्क्रियौधः
स्वधीतवेदागमत्त्ववेत्ता।
वर्णाश्रमाचारपरोऽधिदीक्षो
दक्षस्तपस्वी गुरुरास्तिकोऽस्तु।।५।।

विमर्शिनी।

गुरुलक्षणमाह - विप्र इति। विप्रो गुरुरस्तु ब्राह्मणो गुरुर्भवतु। सर्ववर्णेषु मध्ये ब्राह्मणस्यैव प्रतिष्ठादिकर्मण्यधिकार इत्यर्थः। तेषु मध्ये कुलीनः विशिष्टकुले जातः। तेष्वपि मध्ये कृतसंस्क्रियौघः संस्क्रियाः गर्भाधानाद्यग्न्याधानान्तिमा[१]ः क्रियाः, तासामोघः समूहः, स कृतो यस्य स तथोक्तः। तेष्वपि मध्ये स्वधीतवेदागमतत्त्ववेत्ता सुष्ठु सद्गुरुभ्यस्तदधीनो भूत्वाधीतानां पठितानां वेदानामागमानां चार्थस्य तात्पर्यस्य च ज्ञाता। तेष्वपि मध्ये वर्णाश्रमाचारपरः। वर्णाश्रमयोर्विहितेष्वाचारेषु तत्परः। तेष्वपि मध्येऽधिदीक्षोऽधिगतदीक्षः प्राप्तदीक्षः। तेष्वपि मध्ये दक्षः कर्मणि पटुः। तेष्वपि मध्ये तपस्वी बहुप्रकारतपोयुक्तः। तेष्वपि मध्य आस्तिक ईश्वरादिष्वस्तित्वबुद्धियुक्तः।।५।।

विवरणम्

गुरुलक्षणमाह - विप्र इति। गुरुरस्त्विति सम्बन्धः। संस्क्रिया गर्भाधानादयः। तासामोघो यथाशक्ति निचयः। तत्त्वं तात्पर्यतः प्रतिपाद्यं वस्तु। अधिगता लब्धाः गुरुतः प्राप्ताः, दीक्षास्तन्त्रसिद्धाः संस्क्रियाः येन सोऽधिदीक्षः। तपांसि मासोपवासा-दीनि।।५।।

स्नात्वाचम्याथ देवालयगुरुनिलयाद्येषु सम्मार्जनाद्यै-
र्भूमिं संशोध्य सोदग्दशपटयुगदर्भासनेषूपवेश्य।
आचार्यं मूर्तिपालानपि मनुमहितात्मेष्टविघ्नाधिराजः
संवन्द्यैतान्निदध्याच्छिवदिशि यजमानोऽर्घ्यपाद्यादिकानि।।६।।

---

१. 'माः ता' क. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ गुरुवरणविधानमाह - स्नात्वेति। अथ यजमानोऽर्घ्यपाद्यादिकानि निदध्यादिति सम्बन्धः। अथेत्यस्य धनधान्यादिसाधनसम्पत्तौ सत्यामुत्तरायणादिकाले च प्राप्त इत्यर्थः। यजमान इत्यस्यात्र वरणकर्मणि ब्राह्मणक्षत्रियेष्वन्यतमो[1] यजमानश्चेत् स्वयमेव वृणीत, वैश्यशूद्रानुलोमप्रतिलोमेष्वन्यतमश्चेद् ब्राह्मणेन तत्कर्म कारयित्वा स्वयं तस्य दक्षिणां दत्त्वा तत्कर्म परिगृह्णीयादित्यभिप्रायः। किं कृत्वेत्यत्राह - स्नात्वाचम्येति। स्नानमाचमनं च विशेषतस्तदर्थं कर्तव्यमित्यभिप्रायः। देवालयगुरुनिलयाद्येषु कस्मिंश्चिद् देवालये[2] गुरुगृहे वा, आद्यशब्देन स्वालयादौ वा गुरुमानाय्य[3]। सम्मार्जनाद्यैर्भूमिं संशोध्य मुष्ट्यादिसादनपूर्वकं यथावत् स्थलशुद्धिं कृत्वा। सोदग्दशपटयुगदर्भासनेषु उदग्दशानामुदगग्राणां पटानां वस्त्राणां युगेन युग्मेन प्रागग्रैर्दर्भैश्च युक्तेष्वासनेषु। दक्षिणादिक्रमेण आचार्यं स्वगुरुम्। मूर्तिपालान् दीक्षाकाल एवाचार्येण दत्तां स्वां स्वां वासुदेवादिकां मूर्तिं पालयन्ति सेवन्ते इत्याचार्यशिष्या एव मूर्तिपालाः, तानपि। हस्तालम्बनपूर्वकं पूर्वाभिमुखानेवोपवेश्य। मनुहितात्मा भूत्वा गुरुवन्दनादिपूर्वं स्वस्वमूलमन्त्रस्य सकलीकरणं शङ्खपूरणमात्माराधनं च कृत्वेत्यर्थः। इष्टविघ्नाधिराजश्च भूत्वा स्वबीजेन गणपतिमूलेन प्रदीपं चाराध्येत्यर्थः। एतान् गुरुमूर्तिपालान् संवन्द्य तदनुज्ञापुरस्सरं शिवदिशि ईशानकोणे अर्घ्यपाद्यादिकानि निदध्यात्।।६।।

विवरणम्

इदानीं गुरुंर्वरणं प्रस्तौति-स्नात्वाचम्येति*। अथ कर्ता स्नात्वाचम्येति योजनीयम्। कर्माङ्गतया स्नानमेतत्। देवालयगुरुनिलयादाविति स्वालयपुण्योद्यानादिग्रहणम्। स्वमन्त्रञ्चितात्मेति। यन्मन्त्रमूर्तिर्देवः प्रतिष्ठापयितुमभिमतस्तन्मन्त्र इह स्वमन्त्रोऽभिप्रेत, तस्य सकलीकरणमात्माराधनं च कृत्वेति भावः। भूमिं संशोध्येति। वरणमण्डपं संवृतोद्देशमेव वा सम्पाद्य तत्र स्थलं मुष्ट्यादिभिर्मार्जनालेपनाभ्यामेव वा शोधयित्वेत्यर्थः। सोदग्दशपटयुगदर्भासनेष्विति। उदग्दशयोः पटयोर्युगेन दर्भेण च सहितेष्वासनेष्वित्यर्थः। गुरोर्मूर्त्तिपानां च आसनानि पश्चिमोद्देशे दक्षिणादिक्रमेण निधाय तदुपर्युदग्दशतया वस्त्राणां द्वयं

---

१. 'ययोरन्य' क. ख. पाठः, २. 'ये वा गु', ३. 'चार्यं स' ख. पाठः

* स्नात्वाचम्याथं देवालयगुरुनिलयादौ स्वमन्त्राञ्चितात्मा
भूमिं संशोध्य सोदग्दशपटयुगदर्भासनेषूपवेश्य।
कर्ता स्नातान् यथार्हं गुरुमथ तदुदङ्मूर्त्तिपान् विघ्नमिष्ट्वा
दीपं चामून् प्रवन्द्येश्वरदिशि पुरतोऽर्घ्यादि सम्पादयेच्च।।

इति विवरणपाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

द्वयमास्तीर्य तदुपरि ह्रस्वदर्भांश्च कृत्वा तेष्वासनेष्विति भावः। उपवेश्येति हस्तग्रहणेनोपवेशनमुक्तम्। यथार्हं स्नातानिति कर्माङ्गतया मन्त्रस्नानाद्यभिप्रायम्। यथार्हमुपवेश्येति पादप्रक्षालनादिपूर्वकत्वमुक्तम्। किं च यथार्हं गुरुं मूर्तिपांश्चेति। यथार्हं सत इत्यर्थः। गुरुस्तावत् स्वयमेव देवः, तस्य कलाव्यष्टयो यथास्वं वासुदेव-शर्वादिमूर्तयस्तद्रूपा मूर्त्तिपाः। तथा सतो गुरुं मूर्त्तिपांश्चेति भावः। तथानुसन्धानार्थ-मेतदुक्तम्। गुरुमपि तदुदङ्मूर्तिपानिति। दक्षिणासनादिक्रमेणेति भावः। विघ्नमिष्ट्वेति। तत्र प्राग्भागे स्थण्डिले स्वस्तिके वा गणपतिं निजबीजमन्त्रेण पूजयेत्। तद्विधानं च पूजापटले भविष्यति। दीपं चेति। इष्ट्वेत्यनुकर्षः। प्रणवेन श्रीबीजेन वा दीपपूजा। एतान् अमूनिति गुरुमूर्तिपान्। पुरत ईश्वरदिश्यर्घ्यादि सम्पादयेच्चेति सम्बन्धनीयम्।।६।।

न्यक् पात्राणि निधाय दर्भनिचये वस्त्राद्यपि प्रोक्षणी-
तोयैः प्रोक्ष्य सुसंस्कृतैरथ समुत्तानेषु पात्रेष्वपि।
कूर्चं न्यस्यतु तारतोऽर्घ्यमपि पाद्याचामकं योजयि-
त्वाभ्यार्च्याभिमृशेत् स्वमूलमनुना मूर्त्याह्वयैर्वाङ्गकैः।।७।।

विमर्शिनी

सादनक्रममाह - न्यगिति। दर्भनिचये स्वस्येशभागे स्थण्डिलमालिप्य दर्भसमूहं विन्यस्य तत्र प्रोक्षणीपात्रेण सह चत्वारि पात्राणि न्यक् अधोमुखं निधाय। वस्त्राद्यपि वस्त्राङ्गुलीयकुण्डलयज्ञसूत्रभूषणादीन्यपि निधाय। सुसंस्कृतैः प्रोक्षणीतोयैः प्रोक्षणीसंस्कारं कृत्वा तज्जलैः प्रोक्ष्य। अथ धारणादिभिश्च संशोध्य। समुत्तानेषु पात्रेष्वपि प्रोक्ष्य तेषु तारतः कूर्चं न्यस्यतु। अर्घ्यं पाद्याचामकमपि पाद्यमाचमनीयं च स्वस्वद्रव्यैर्योजयित्वा स्वमूलमनुना मूर्त्याह्वयैः स्वस्वमूर्तीनां मन्त्रैः। अङ्गकैः स्वार्थ एव कप्रत्ययः। स्वस्वदानकाले वक्ष्यमाणैरङ्गैरेव वा अभ्यर्च्य अभिमृशेत् स्पृष्ट्वा जपेत्।।७।।

विवरणम्

एतदेव विवृणोति - न्यक्पात्राणीति। प्रागग्रे दर्भनिचये पश्चिमादिक्रमेण प्रोक्षणीपात्रमर्घ्यादिपात्रत्रयं च सादयेत्। वस्त्राद्यपीति वस्त्राङ्गुलीयककुण्डलयज्ञसूत्रादि-ग्रहणम्। सुसंस्कृतैः प्रोक्षणीतोयैरिति। प्रोक्षणीसंस्कारः कल्पप्रसिद्धः। यद्वा तन्त्रसिद्ध एव। यदाह -

www.shripuram.org
Shripuram Publications
www.shripuram.org

"सकूर्चे गन्धपुष्पाढ्ये जले ताराभिमन्त्रिते।
ध्यात्वा मन्त्रमयं ज्योतिः प्रोक्षणं द्रव्यशोधनम्।।"

इति। समुत्तानेषु पात्रेष्वपि प्रोक्ष्येत्यन्वयः। मनुविदिति फडन्तप्रणवेन प्रोक्षणमुक्तम्। शोषणादि सर्वं सामान्यसिद्धम्। वस्त्रादिष्वपि प्रोक्षणमपिशब्देनोक्तम्। तारत इति योजने पूजने च मन्त्र उक्तः। स्वमूलमनुना मूर्त्याह्वयैरभिमृशेदित्येकः पक्ष उक्तः। इह सर्वेषामपि सर्वैरभिमन्त्रणं कार्यम् अङ्गकैर्वेत्यपरः पक्षः। अत्र तु अर्घ्यस्य शिरसा पाद्यस्य हृदयेन आचमनीयस्य शिखयेत्यादि यथाविनियोगमङ्गनियमोऽवसेयः। पूजनाभिमन्त्रणे वस्त्रादिष्वपि भवतः।।७।।

विष्णौ माषपयोधिकं स्मृतमिहार्घ्यं पद्मपत्रादिकै-
स्तान्याच्छाद्य गुरुं समूर्तिपममुं संवन्द्य दद्यात् क्रमात्।
पाद्याचामकमर्घ्यकं स्वमनुतो हृच्छीर्षशैखैस्तु वा
वस्त्रे द्वे कवचाणुनास्त्रमनुना स्वर्णाङ्गुलीयं तथा।।८।।

विमर्शिनी

विष्णौ इह वरणे अर्घ्यं माषपयोधिकं स्मृतम्। तानि पात्राणि पद्मपत्रादिभिराच्छाद्यामुं[1] गुरुं समूर्तिपं मूर्तिपैः सहितं संवन्द्य। पाद्याचामकमर्घ्यकं[2] क्रमात् पाद्याचामनीयार्घ्यक्रमात्। स्वमनुतः गुरुमूर्तिपानां मन्त्रैः। तेभ्यो दद्यात्। हृच्छीर्षशैखैस्तु वा हृदयशिरश्शिखामन्त्रैर्वा। त्विति पाद्यादिना पादशौचादिकं कर्तव्यमिति विशेषद्योतकः। तस्मिन् पक्षे वस्त्रे द्वे द्वे वस्त्रे कवचाणुना कवचमन्त्रेण। तथा स्वर्णाङ्गुलीयं सुवर्णशलाकादिभिर्बद्धं पवित्रमयमङ्गुलीयकम्। अस्त्रमनुना पञ्चाङ्गस्यावसेयत्वात्।।८।।

विवरणम्

इहार्घ्यमिति। वरण एव, न तु सपर्यादिष्वित्यर्थः। पद्मपत्रादिभिरिति पलाशपत्रादिग्रहणम्। स्वमनुत इति। मूलेन गुरवे वासुदेवादिमन्त्रैर्विष्णवादिमन्त्रैर्वा तत्तन्मूर्त्तिपेभ्य इत्यर्थः। हृच्छीर्षशैखैस्तु वेत्यङ्गाभिमन्त्रणपक्षे द्रष्टव्यम्। स्वमनुत इत्यस्य वेत्यस्य च भूषान्तमनुवृत्तिरिष्यते।।८।।

---

१. 'द्याथामुं' ग. पाठः, २. 'कं पा' क. ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

दत्त्वास्त्रतः कुण्डलयज्ञसूत्र-
भूषास्ततः स्वाणुभिरर्चयित्वा।
अर्घ्यं च दत्त्वा सहमूर्तिपालं
सम्भोजयेत् साज्यममुं पयोन्नम्।।९।।

विमर्शिनी

कुण्डलादीनां को मन्त्र इत्यत्राह - दत्त्वास्त्रत इति। कुण्डलयज्ञसूत्रभूषाः स्वर्णमयं कुण्डलयुगं यज्ञसूत्रं चन्दनादि च अस्त्रतो दत्त्वा। ततः स्वाणुभिः स्वस्वमन्त्रैर्जलगन्धपुष्प-धूपदीपाक्षतैरर्चयित्वा। पुनरप्यर्घ्यं दत्त्वा सहमूर्तिपालं मूर्तिपालैः सहितममुं गुरुं साज्यं पयोन्नं पायसं सम्भोजयेत् सम्यग् यथाभिलषितं भोजयेत्।।९।।

विवरणम्

भूषाः उष्णीषकटकाद्यलङ्काराः। ततः स्वाणुभिरित्येतदङ्गपक्षेऽपि समानम्। स्वाणुविदिति वा पाठः। अङ्गपक्षे गुरुमूर्तिपानामप्यर्चने मूलमेव मन्त्र इह लभ्यते। सघृतं पयोन्नमिति। पायसं घृतप्रधानमुपसेचनादियुक्तमिति भावः।।९।।

भुक्त्वाचान्तेष्वेषु दत्त्वावसानी-
याघ्यं तेभ्यो भुक्तसत्कारपूर्वम्।
आलिप्योर्वीं तान् प्रणम्याभिवाद्य
प्रार्थ्यानेनालम्ब्य पाणौ वृणीत।।१०।।

विमर्शिनी

भुक्त्वा एषु गुरुमूर्तिपेषु आचान्तेषु कृताचमनेषु सत्सु। तेभ्यो भुक्तसत्कारपूर्वं भोजनानन्तरं योग्याः सत्कारास्ताम्बूलापूपादयः ते पूर्वं यथा भवति तथा। अवसानीयार्घ्यं अवसानभवमर्घ्यं दत्त्वोच्छिष्टादिकमुद्धृत्य उर्वीं भूमिमालिप्य तान् प्रदक्षिणीकृत्य प्रणम्याभिवाद्य प्रसादं प्रार्थ्य। पाणौ दक्षिणकरे दक्षिणकरेणालम्ब्यानेन मन्त्रेण वृणीत।।१०।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

भुक्त्वाचान्तेष्विति करमुखशोधनादिपूर्वमाचमनमुक्तम्। भुक्तसत्कारपूर्वमिति। ताम्बूलपूगफलमोदकादिदानमुक्तम्। दक्षिणापि यथाशक्तीष्यत एव। यदाह - "शक्त्या दत्त्वा च दक्षिणाम्" इति। तान् प्रणम्येति। तत्तन्मन्त्रैरिति शेषः।।१०।।

मया सम्पूजितैरत्र दक्षिणाभिश्च तोषितैः।
क्रियतां विष्णुयागो मे प्रार्थयामि प्रसीदत।।११।।

विमर्शिनी

वरणमन्त्रं पठति - मया सम्पूजितैरिति।।११।।

विवरणम्

प्रार्थनामन्त्रमाह - मयेति। सकृन्मन्त्रप्रयोगः पाणावालम्ब्य वृणीतेति क्रियतां विष्णुयागो म इति प्रार्थनायां वरणे च साधारणम्। ततश्च सकृन्मन्त्रोच्चारणेन प्रार्थना गुर्वादिकरग्रहणरूपं वरणं च कार्यम्। वक्ष्यति च - "सङ्ग्रहेण वरणक्रियाक्रमः" इति। यद्वा प्रार्थनायामेवायं मन्त्रः। वरणं तु पुनः स्यात्। यदुक्तं - "इत्युक्त्वा दक्षिणे पाणावालम्ब्य वरयेत् ततः" इति। वरणं त्वेवं वा स्यात्। 'ओं विष्णुयागे गुरुकर्म क्रियताम् ओं विष्णुयागे मूर्तिपकर्म क्रियताम् इति, ओं विष्णुयागे गुरुं त्वां वृणे गुरुकर्म क्रियतां विष्णुयागे मूर्तिपं त्वां वृणे मूर्तिपकर्म क्रियताम्' इति वा।।११।।

स्वस्वदोस्समवलम्बने वद-
न्त्वों तथेपि गुरुमूर्तिपालकाः।
इत्यभाषि हरिसुम्भविद्विषोः
संग्रहेण वरणक्रियाक्रमः।।१२।।

विमर्शिनी

ते गुरुमूर्तिपालकाः स्वस्वदोस्समवलम्बने स्वस्वकरग्रहणे 'ओं तथा' इति वदन्तु। प्रथमं गुरोर्वरणं कृत्वा मूर्तिपालानपि पृथक् पृथग् वृणुयात्। तदा तदा स स मूर्तिपः 'ओं तथे'ति वदत्वित्यर्थः। हरिसुम्भविद्विषोः विष्णुदुर्गयोः वरणक्रियाक्रमः वरणक्रिया[१]विधिः। संग्रहेण संक्षेपेण इति अभाषि उक्तः।।१२।।

---

१. 'याया वि' क. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

विवरणम्

सङ्ग्रहेणेति। अनेन समाचारे विशेषोऽपि सूचितः।

"दत्त्वा कूर्चान्यथैतेषामासनार्थं तु वाग्यतः।
सपवित्रैर्जलैः पादौ क्षालयेद्धृदयेन तु।।" इत्यादि।।१२।।

पाद्याद्यङ्गानि क्रमात् स्वाभिषेके
वक्ष्ये मूलं स्याद् गुरोर्मूर्तिपानाम्।
मन्त्राः स्वे स्वे मूर्तिमन्त्राः शिवादि-
ष्विष्टे पाद्यादिक्रमान्न्यासदाने।।१३।।

विमर्शिनी

पाद्याद्यङ्गानि पाद्यादीनां द्रव्यभेदान्। स्वाभिषेके स्वस्वद्रव्यकलशविधौ क्रमाद् वक्ष्ये। गुरोः मूलं मन्त्रः स्यात्। मूर्तिपानां स्वे स्वे मूर्तिमन्त्राः वासुदेवादयो मन्त्राः स्युः। शिवादिषु देवेषु पाद्यादिक्रमात् पाद्यार्घ्याचमनीयक्रमात् न्यासदाने न्यासं सादनं प्रदानं च इष्टे भवतः।।१३।।

विवरणम्

स्वाभिषेक इति। विष्णुदुर्गयोः शिवादीनामपि स्नपनप्रकरण इत्यर्थः। मूलं स्याद् गुरोरिति शिवाद्यभिप्रायमेव। तेन शिवादिषु मूलपक्ष एवास्ति नत्वङ्गपक्ष इत्यपि प्रतिपादितं भवति। स्वे स्वे मूर्तिमन्त्रा इति। अयमिह मूर्तिविभागः। विष्णौ वासुदेवादयश्चत्वारो विष्ण्वादयोऽष्टौ केशवादयो द्वादश। दुर्गायां पौरुष्याद्याश्चत्वारो जयाद्या अष्टौ। शिवे तत्पुरुषादयश्चत्वारश्शर्वादयोऽष्टौ। उभये द्वादश। शङ्करनारायणे तु शैववैष्णवा व्यामिश्राः। स्कन्दे सनत्कुमारस्कन्दादयः षट्। गणपतौ विघ्नविनायकादयश्चत्वारो गणञ्जयादयोऽष्टौ। उभये द्वादश। शास्तरि प्रभुगोप्तृमहाशास्तृरेवन्ताश्चत्वारो गोप्त्रादयोऽष्टौ। उभये द्वादश। सर्वेष्वपि तु यावतामुपर्यधिवासहोमादिकार्यं तावतामिह वरणम्। वक्ष्यति हि- "स्वहवनाद्यनुसृत्ये"ति। न्यासदाने इति न्यासस्सम्पादनम्। सर्वेषु मूलमूर्तिमन्त्राः पूजाकार्मशेषभाविन एव।।१३।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

शर्वायक्षित्यादिप्रभिन्नात्मवर्णो
ङेनत्यन्तः स्यान्मूर्तिपाणुर्महेशे।
तेषां नत्यां क्षित्यादिमन्त्रा गुरोस्तु
शैवी गायत्री त्र्यम्बकायेत्यणुर्वा।।१४।।

विमर्शिनी

महेशे शिवे शर्वायक्षित्यादिप्रभिन्नात्मवर्णः 'शर्वाय क्षिति' इत्यादिभिः सम्भिन्नो युक्त आत्मवर्णः आत्म इति वर्णः। ङेनत्यन्तः, ङे चतुर्थ्येकवचनं तद्, नतिः नम इति च अन्ते अवसाने यस्य स तथा। 'शर्वाय क्षित्यात्मने नमः' इति द्रष्टव्यः। मूर्तिपाणुः मूर्तिपानामणुः मन्त्रः। तेषां मूर्तिपानां नत्यां नमस्कारे क्षित्यादिमन्त्राः क्षितीत्यादिः[1] यस्य स क्षित्यादिः, क्षित्यादिरादिर्येषां ते क्षित्यादिमन्त्राः। गुरोस्तु तस्यां शैवी गायत्री तन्महेशायेत्याद्या मन्त्राः, त्र्यम्बकायेत्यणुर्वा। त्र्यम्बकायेति मन्त्रः मङ्गलाङ्कुररोपणे वक्ष्यते।।१४।।

विवरणम्

शिवे त्वस्ति विशेष इति मन्यमानस्तस्मिन् मूर्तिमन्त्रानुद्धरति शर्वायक्षित्यादि-प्रभिन्नात्मवर्ण इति। यथा - ओं शर्वाय क्षित्यात्मने नमः, ओं रुद्रायाग्न्यात्मने नमः, इत्यादि। मूर्तिपाणुरिति मूर्तिपानां मन्त्राः। त्र्यम्बकायेत्यणुर्वेति बीजवापे वक्ष्यमाणस्य ग्रहणम्।।१४।।

शर्वो रुद्रः पशुपतिरथेशानयुक्तौ भवोग्रौ
प्रोक्ताः शर्वादय इति महादेवभीमौ च ते स्युः।
क्षित्यग्न्याख्यौ त्रिपुरजयिनो यज्ञसूर्यौ जलाख्यं
वायुं सोमं समभिदधते व्योम चाप्यष्टमूर्तीः।।१५।।

विमर्शिनी

शर्वादीनाह - शर्व इति। अथ शर्वः रुद्रः पशुपतिः ईशानयुक्तौ ईशानसहितौ भवोग्रौ ईशानो भव उग्रश्चेत्यर्थः। महादेवभीमौ महादेवो भीमश्च ते शर्वादयः प्रोक्ताः

---

१. 'दिः क्षित्यादिरा' क. पाठः

Shripuram Publications
www.shripuram.org

स्युः। क्षित्यग्न्याख्यौ क्षितिमग्निं च। यज्ञसूर्यौ यज्ञं सूर्यं च। जलाख्यं जलमित्याख्या यस्य स जलाख्यः, तं च। वायुं सोमं व्योम च। त्रिपुरजयिनः शिवस्य। अष्टमूर्तीः अष्टमूर्तिसंज्ञाः। समभिदधते ब्रुवते। बुधा इति शेषः।।१५।।

विवरणम्

शर्वादिमूर्तिमन्त्रान्तर्गतान् पठति - शर्वो रुद्र इति। क्षित्यादीनपि पठति - क्षित्यग्न्याख्याविति।।१५।।

क्षितिर्वै धार्यते लोकान् लोकाः क्षितिमयाः स्मृताः।
सर्वगं क्षितिरूपं ते क्षितिमूर्ते! नमोऽस्तु ते।।१६।।

अग्निर्वै धार्यते लोकान् लोका अग्निमया स्मृताः।
सर्वगमग्निरूपं ते अग्निमूर्ते नमोऽस्तु ते।।१७।।

यज्ञो धारयते लोकान् लोका यज्ञमयाः स्मृताः।
सर्वगं यज्ञरूपं ते यज्ञमूर्ते! नमोऽस्तु ते।।१८।।

सूर्यो धारयते लोकान् लोकाः सूर्यमयाः स्मृताः।
सर्वगं सूर्यरूपं ते सूर्यमूर्ते! नमोऽस्तु ते।।१९।।

जलं वै धार्यते लोकान् लोका जलमयाः स्मृताः।
सर्वगं जलरूपं ते जलमूर्ते! नमोऽस्तु ते।।२०।।

वायुर्धारयते लोकान् लोका वायुमयाः स्मृताः।
सर्वगं वायुरूपं ते वायुमूर्ते! नमोऽस्तु ते।।२१।।

सोमो धारयते लोकान् लोकाः सोममयाः स्मृताः।
सर्वगं सोमरूपं ते सोममूर्ते! नमोऽस्तु ते।।२२।।

व्योम धारयते लोकान् लोका व्योममयाः स्मृताः।
सर्वगं व्योमरूपं ते व्योममूर्ते! नमोऽस्तु ते।।२३।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी।

नमस्कारमन्त्रान् पठति - क्षितिर्वै धार्यत इत्यादि।।१६-२३।।

विवरणम्

मूर्तिपानां नमस्कारमन्त्रानपि पठति - क्षितिर्वै इति।।१६-२३।।

स्वस्वनाम वरणाणुविष्णुशब्दास्पदेऽत्र सुयुनक्तु युक्तितः।
वास्तुसंग्रहपुरः सराणुना बाहुलेयविषये वृणीत तान्।।२४।।

वास्तुसंग्रहमारभ्य तीर्थस्नानावसानिकम्।
क्रियतां स्कन्दयागो मे प्रार्थयामि प्रसीदत।।२५।।

विमर्शिनी

अत्र वरणाणुविष्णुशब्दास्पदे वरणाणोर्वरणमन्त्रस्य 'मया सम्पूजितैरि'त्यस्य विष्णुशब्दास्पदे विष्णुशब्दस्य स्थाने। स्वस्वनाम शिवादिनाम। युक्तितः पद्याविरोधेन। सुयुनक्तु 'क्रियतां शिवयागो मे' इत्यादिप्रकारेण युञ्ज्यादित्यर्थः। बाहुलेयविषये बाहुलेयः स्कन्दः तद्विषये वरणे। तान् गुरुमूर्तिपान्। वास्तुसंग्रहपुरस्सराणुना वास्तुसंग्रहमिति पुरतः सरति गच्छतीति वास्तुसंग्रहपुरस्सरः। 'वास्तुसंग्रहमि'त्यादिना मन्त्रेण वृणीतेत्यर्थः।।२४-२५।।

विवरणम्

सर्वेषु प्रार्थनामन्त्रे विशेषं दर्शयति - स्वस्वनामेति। मया सम्पूजितैरित्ययं वरणमन्त्रः, तस्मिन् विष्णुशब्दस्य स्थाने। स्वस्वनाम युक्तितस्सुयुनक्त्विति। पूर्वानुरोधेनेति भावः। यथा दुर्गायागो मे क्रियताम्। शिवयागो मे (क्रियतां) हरीशयागः क्रियतामित्यादि।।२४।।

सङ्ग्रहेण तु मन्त्रान्तरमाह - वास्तुसङ्ग्रहेत्यादि। नाममन्त्रेणेत्यर्थः।।२५।।

एवं गुरुं गुरुनियोगकृतो विनीतान्
विप्रान् विधानकुशलानपि मूर्तिपालान्।
सर्वेष्वपीह चतुरो द्विगुणान् वृणीत
षड्वा तथा स्वहवनाद्यनुसृत्य कर्ता।।२६।।

Shripuram Publications
www.shripuram.org

विमर्शिनी।

वरणकर्मोपसंहरन् मूर्तिपलक्षणमाह - एवमिति। कर्ता सर्वेष्वपि देवेषु एवमुक्तेन प्रकारेण गुरुम्। इह मूर्तिपवरणे। गुरुनियोगकृतः गुरोर्नियोगं कुर्वन्तीति गुरुनियोगकृतः, तान्। विनीतान् स्वतः क्षमाशीलान्। विधानकुशलान् कर्मसु विदग्धान् विधिज्ञांश्च। विप्रान् ब्राह्मणानेव मूर्तिपालानपि। चतुरः चतुः सङ्ख्यान्। द्विगुणान्[1] तद्द्विगुणान् अष्टौ वेत्यर्थः। तथा षड् वा द्वादश वा, यथा चतुःसङ्ख्योक्तिः। स्वहवनादि स्वस्वहोमादिकर्माणि[2]। अनुसृत्य विमृश्य वृणीत।।२६।।

विवरणम्

मूर्तिपानां लक्षणं सङ्ख्यां च वदन् वरणमुपसंहरति - एवं गुरुमिति। षड्वेति स्कन्दविषयम्। वक्ष्यति च - "षाण्मातुरे षट्स्वि"ति। स्वहवनाद्यनुसृत्येति। अधिवासहोमाद्यनुसारेणेत्यर्थः। यावन्तोऽधिवासहोमाः तावन्तोऽवश्यं मूर्तिपाः स्युः। यत उक्तम्-

"चतुर्भिर्मूर्तिपैस्सार्धमष्टद्वादशभिस्तु वा।"

इति। एकहोमोपपत्तौ तु अन्यत्रापि मूर्तिपोपयोगाद् एकोऽपि वरणीयः। आदिशब्देन दिशाहोमचतुर्थदिनस्नपनादि गृह्यते। तत्रापि बलिपीठद्रव्यकलशबहुत्वात् तत्पूजौचित्येन मूर्तिपसङ्ख्यानियमात् प्रायश्चित्तहोमो वा दिशाशब्देनाभिप्रेतः। तत्राप्यनया रीत्या वरणं कार्यमित्यप्यर्थादवसीयते। यदुक्तम्-

"प्रार्थितस्त्वेवमाचार्यो मूर्तिपालैः समन्वितः।
स्थानशुद्धिं ततः कुर्याद्"

इत्यादि। एवं जीर्णोद्धारेऽपि। अथवा स्वहवनाद्यनुसृत्य वृणीतेति। स्वीयहोमपूजादौ स्वस्याधिकारे सति कर्ता स्वयं वृणीतेति। तदनधिकारे तु परेणैव वरणं कारयेत्। तत्रापि वरणमात्रं तु स्वयं कुर्यादिति। शूद्रादेर्न होमादावधिकारः। तदुक्तम्-

'व्याख्या(?)स्थापितदेवार्चाहोमेष्वस्य न कर्तृता।
दीक्षितस्यापि किन्त्वेष कामं विप्रैस्तु कारयेत्।।" इति।।२६।।

---

१. 'न् अ' ख. पाठः, २. 'र्मणि वि' ग. पाठः

Shripuram Publications
www.shripuram.org

यियक्षुणाचार्यवरो वृतोऽथ समूर्तिपः कर्म समातनोतु।
प्रतिश्रुतं भूमिपरिग्रहादि तीर्थाभिषेकावधिकं क्रमेण।।२७।।

विमर्शिनी

एवं यजमानस्य कर्माभिधाय गुरोः कर्मोद्दिशति - यियक्षुणेति। अथ यियक्षुणा यष्टुमिच्छावता। यजनं नाम भूपरिग्रहादि तीर्थस्नानपर्यन्तं कर्म विवक्ष्यते। यजमानेन वृत आचार्यवर इत्यनेन प्रतिष्ठादिकर्मण्याचार्यश्रेष्ठस्यैवाधिकार इत्युक्तम्। समूर्तिपः मूर्तिपैर्युक्तः। भूमिपरिग्रहादि भूमिपरिग्रहमारभ्य। तीर्थाभिषेकावधिकम् उत्सवान्तगततीर्थ-[१] स्नानमवधीकृत्य। यत् कर्म स्वेन प्रतिश्रुतं प्रतिज्ञातं, तत् क्रमेण समातनोतु कुर्यात्।।२७।।

विवरणम्

अथ वृतस्य गुरोः कृत्यं वदन् वक्ष्यमाणकर्मसु तस्यैव सम्प्रत्यय इत्यपि नियमयति - यियक्षुणेति। भूपरिग्रहादितीर्थस्नपनान्तं कर्मेह यजनम्। प्रतिश्रुतं, वरणसमय ओं तथेति प्रतिज्ञातम्।।२७।।

तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे
शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा।
सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने
देशेऽन्यत्र मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत्।।२८।।

विमर्शिनी

सर्वदेवानां सामान्येन प्रतिष्ठास्थानान्याह - तीर्थान्त इति। तीर्थान्ते तीर्थसमीपे। तटिनीतटे नदीतीरे। जलनिधेस्तीरे, जलनिधिः समुद्रः तस्य तीरे। सरित्सङ्गमे नद्योर्मिथः सङ्गमे नदीसमुद्रसङ्गमे च। शैलाग्रे पर्वतोपरिभागे। अद्रितटे पर्वतस्य पार्श्वप्रदेशे। वनोपवनयोः वने उपवने च। उपवनं ग्रामसमीपस्थारण्यम्। उद्यानदेशे उद्यानं कृत्रिमोपवनम्। वातथाशब्दौ विकल्पद्योतकौ। सिद्धाद्यायतनेषु, सिद्धास्तपआदिभिः कृतकृत्याः, तेषां तादृशानामन्येषां चायतनेष्वाश्रयस्थानेषु। ग्रामे विप्रसमूहस्यावासे। पुरे राजधान्याः समीपे। पत्तने नगराभ्याशे। अन्यत्र मनोरमे च देशे। गुरुवरः सुरसमिज्यायै देवप्रतिष्ठाविधये क्षितिं कल्पयेत्। अत्र पूर्वपूर्वोक्तानि स्थानानि श्रेष्ठानीत्यवगन्तव्यम्।।२८।।

---

१. 'द्वासान्त' ग. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्।

तत्र प्रथमं भूपरिग्रहं विवक्षन् परिग्राह्याया भुवो लक्षणपरीक्षाभ्यामवधारणमिति तदभिधित्सायाः पूर्वं तावत् तद्भूसमुचितान् प्रदेशानुपदिशति - तीर्थान्त इति। अन्तशब्दः समीपवचनः। तटिनी नदी। सिद्धाद्यायतनेषु वेति। यत्र सिद्धाः सिद्धिं प्राप्तास्तत् सिद्धायतनम्। सिद्ध्याद्यायतनेषु वेति वा पाठः। आदिशब्देन धर्मायतनादिग्रहणम्। वेति सर्वत्र योज्यम्॥२८॥

प्राचि प्रतीचि च हरौ निजदिश्युमेशे
वायौ निसुम्भजिति तारकजित्युदीच्याम्।
ग्रामादिकेषु निर्ऋतौ गणपार्यनाम्नो-
गृह्णातु भूमिमखिलेष्वपि मध्यतो वा॥२९॥

विमर्शिनी।

अथ ग्रामे पुरे पत्तन इत्युक्तेषु ग्रामादिकेषु विष्ण्वादीनां देवानां स्थाननियममाह - प्राचीति। हरौ ग्रामादिकेषु प्राचि प्राग्भागे प्रतीचि च प्रत्यग्भागे भूमिं गृह्णातु। उमेशे शिवे निजदिशि ईशभागे। निसुम्भजिति दुर्गायां वायौ वायुभागे। तारकजिति स्कन्दे उदीच्यां उदग्भागे। गणपार्यनाम्नोः गणपतौ शास्तरि च निर्ऋतौ निर्ऋतिभागे। अखिलेषु विष्ण्वादिसप्तस्वपि मध्यतो वा मध्यभागे वा॥२९॥

विवरणम्।

सुरसमिज्यायै देवप्रतिष्ठापनार्थं ग्रामादिष्वपि प्रदेशविशेषानाह - प्राचीति। ग्रामादिकेषु प्राचि प्रतीचि चेत्यन्वयः। उमेशे निजदिशीति। ऐशान्यामित्यर्थः। अखिलेष्वपि मध्यतो वेति। शिवनारायणे मध्यतः। तदितरेषु सर्वेष्वपि मध्यतो वेत्यर्थः। स्वपदे गिरीशे वायौ निसुम्भजिति इति वा पठनीयम्। तेन प्रागादि सर्वमपि वास्तुपदमिति विशेषो लभ्यते। ग्रामपुरादिभूमण्डला सप्तवर्गकोष्ठतयाष्टवर्गकोष्ठतया नववर्गकोष्ठतया वा विभज्य मध्यतः कोष्ठचतुष्कं कोष्ठनवकं वा ब्राह्मं पदं सङ्कल्प्य तत्परितो दैवमानुषपैशाचा-वरणान्येकैकपरिपङ्क्त्या कल्पयेत्। तत्र पैशाचे प्राचि प्रतीचि चोद्देशे हरेः स्थानम्। सोमभृशपदोपलक्षणमेतत्। न चैष नियमः। यदाह -

Shripuram Publications
www.shripuram.org

"अन्तरालेषु सर्वेषु दिक्षु चैवं विदिक्षु च।
सर्वत्र वैष्णवं गेहं ग्रामस्य नगरस्य च।।"

इति। स्वपद इति पर्जन्यजयन्तपदोपलक्षणम्। नाप्येष नियमः। यदप्याह -

"अष्टदिक्षु च कर्तव्यं ग्रामादिषु शिवालयम्।
पैशाचिकपदे कुर्यादालयं तु पराङ्मुखम्।।" इति।
"मानुषे तु पदे वाथ कर्तव्यं शिवमन्दिरम्।" इति।
"स्वयम्भुदैविकं चार्षं यत्र तत्र स्थितं तु वा।
न दोषाय भवेत् तस्याप्यग्रं वर्ज्यं शुभार्थिभिः।।"

इति। वायाविति मुख्यसोमोपलक्षणम्। उदीच्यां सोमपदे यमवरुणेन्द्राग्निपदोपलक्षण-मेतत्। निर्ऋताविति। विघ्ने शोषनागमुख्यभल्लाटसोमपदोपलक्षणम्। शास्तरि तु यमादितिपदोपलक्षणम्। शिवोक्तस्थानेष्वपि शिवनारायणः स्यात्। दैवमानुषयोरपि प्रोक्तस्थानेषु स्कन्दस्थापनमिष्यते इति।।२९।।

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्गमा।
सम्प्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा।।३०।।

विमर्शिनी।

अथ भूमेरुत्तमादित्वमाश्रित्य भेदमाह - गोमर्त्यैरिति। गोभिर्मर्त्यैश्चाढ्या आश्रिता। फलपुष्पदुग्धतरुभिः फलवद्भिः पुष्पवद्भिः क्षीरवद्भिश्च वृक्षैराढ्या पूर्णा। समा निम्नोन्नतवर्जिता। प्राक्प्लवा प्राग्भागनिम्ना। स्निग्धा निबिडा। धीररवा गम्भीरस्वरा। प्रदक्षिणजलोपेता प्रादक्षिण्येन नद्यादिनोपलक्षिता। आशुबीजोद्गमा बीजावापे शीघ्रमुद्गच्छदङ्कुरा। बहुपांसुः खात्वा तत्पांसुभिरेव पूरिते गर्तातिरिक्तपांसुयुक्ता। अक्षयजला ग्रीष्मेऽपि प्रभूतजलयुक्ता। शीतोष्णयोस्तुल्या शीतकाले चोष्णकाले च तुल्या, शैत्याधिक्येनौष्ण्याधिक्येन च रहिता। एवम्भूता भूमिः श्रेष्ठा उत्तमा सम्प्रोक्ता। समुक्तविपरीता उक्तलक्षणवैपरीत्ययुक्ता अधमा। मिश्रिता मिश्रलक्षणयुक्ता मध्यमा।।३०।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्।

हेयोपादेयभूविशेषलक्षणमाह - गोमर्त्यैरिति। फलपुष्पदुग्धतरुभिरिति। फलतरुभिः पुष्पतरुभिः दुग्धतरुभिश्च। समा निम्नोन्नतरहिता। प्राग्जलस्य प्लवो यत्र सा प्राक्प्लवा। प्रागित्युदगैशोद्देशोपलक्षणम्। स्निग्धता चिक्कणता। यस्यां दण्डाद्याघाते गम्भीरो ध्वनिः प्रवर्तते सा धीररवा। आशुबीजोद्गमेति। यदुक्तम् - 'यत्र बीजानि त्रिरात्रेण प्ररोहन्ति सोत्तमा' इति। बहुपांसुरिति। यदप्युक्तम्-

"हस्तमात्रं समं खात्वा तन्मृदा पूरयेत् पुनः।
मृत्सयाधिकया श्रेष्ठा समया मध्यमा हि भूः"।।

इति। अक्षयजलेति। यदपि चोक्तम्-

"तत्खातं वा जलापूर्णं कृत्वा पादशतं व्रजेत्।
पुनरागच्छतः प्राग्वत् पूर्णं चेद् भूमिरुत्तमा।।"

इति। समुक्तविपरीतेति। यथा गोमर्त्यव्यतिरिक्तसत्त्वैरत्यन्ताविद्यमानफलपुष्पदुग्धतरुभिश्च युक्तेत्यादि। मिश्रिता मध्यमेति पूर्ववदूह्यम्। द्वयोर्लक्षणयोर्मध्यभाक्त्वं मिश्रितत्वम्। यदुक्तम्। "समया मध्यमा हि भूः" इत्यादि। किं च नानालक्षणद्वयसन्निपातोऽपि मिश्रितत्वम्। यथा - गोमर्त्यैरफलपुष्पदुग्धतरुभिश्चाढ्या" इत्यादि।।३०।।

वृत्तार्धेन्दुनिभा त्रिपञ्चरसकोणा शूलशूर्पाकृति-
र्मत्स्यानेकपकोलपृष्ठकपिलावक्त्रोपमा मेदिनी।[1]
भस्माङ्गारतुषास्थिकेशकृमिवल्मीकादिभिः संयुता
वर्ज्या मध्यनता सगर्भकुहरा विस्रा विदिक्स्थापि च।।

विमर्शिनी।

अथ भूमेर्वर्जनीयलक्षणान्याह - वृत्तेति। वृत्ता स्वत एव वृत्ताकारा। अर्धेन्दुनिभा अर्धचन्द्राकारा। त्रिपञ्चरसकोणा त्रिकोणा पञ्चकोणा षट्कोणा च। शूलशूर्पाकृतिः शूलाकृतियुक्ता शूर्पाकृतियुक्ता च। मत्स्यानेकपकोलपृष्ठकपिलावक्त्रोपमा मीनद्विपवराहाणां पृष्ठसमाना पशुमुखसमाना च। भस्माङ्गारतुषास्थिकेशकृमिवल्मीकादिभिः संयुता भस्मभिः कृष्णाङ्गारैः (അംഗാരം=കരിക്കട്) तुषैः (തുഷം=ഉമി) अस्थिभिः केशैः

१. कूर्मपृ इति मूलकोशपाठः

Shripuram Publications
www.shripuram.org

कृमिभिर्वल्मीकैर्युक्ता[१]। (अत्र[२] पृष्ठसमानपशुमुखसमानरधधार्थ तथा च प्रसिद्धे तर्वा?) मध्यनता मध्यभागनिम्ना। सगर्भकुहरा अन्तर्भागे बिलयुक्ता। विस्रा दुर्गन्धयुक्ता। विदिक्स्थापि च कोणगतदैर्घ्यविस्तारयुक्ता च। एवंभूता मेदिनी भूमिर्वर्ज्या।।३१।।

विवरणम्।

स्वतन्त्राधमभूमिमाह - वृत्तेति। अनेकपो गजः। कोलः सूकरः। कपिला गौरेव। सगर्भकुहरेति गर्भवती बिलयुक्ता च। विस्रा आमगन्धिनी। विदिक्स्थेति। आग्नेयादिविदिग्गतपार्श्वचतुष्टया। यदा तु प्रागुक्तोत्तमभूमिरप्येतदधमलक्षणयोगिनी तदा साप्युपेक्षणीयैवेति बोद्धव्यम्। सर्ववर्णसामान्यतो भूलक्षणमेवमुक्तम्।।३१।।

विप्रादिक्रमतः कुशेषुवनदूर्वाकाशयुक्ता भुव-
स्तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घा अपि।
श्वेतापाटलपीतमेचकरुचश्चाज्यासृगन्नासवा-
मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः।।३२।।

विमर्शिनी।

अथ ब्राह्मणाद्यधिकारिभेदेन भूमेर्लक्षणमाह - विप्रादीति। कुशेषुवनदूर्वाकाशयुक्ताः कुशैरिषुवनेन दूर्वाभिः काशैश्च युक्ताः। भुवः भूभागाः। विप्रादिक्रमतः ब्राह्मणक्षत्रियवैश्य-शूद्रक्रमेण स्मृताः। तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घाः तुल्यदैर्घ्यविस्तारचतुरश्राः। सिन्धुरा गजाः। सिन्धुररसाब्धि[३]शब्दैः अष्टषट्चतुःसङ्ख्या लक्षिताः। विस्तारादष्टषट्चतुरं-शाधिकं दैर्घ्ययुक्ताः। अपिः समुच्चये। समचतुरश्रादिचतस्रो भुवो विप्रादिक्र[४]मतः स्मृता इत्यर्थः। श्वेतापाटलपीतमेचकरुचश्च धवळरक्तपीतकृष्णवर्णाश्च। विप्रादिक्रमतः आज्यासृगन्नासवामोदाश्च घृतरुधिरहविस्सुरागन्धाश्च। स्वादुकषायतिक्तकटुकास्वादान्वि-ताश्च। (സ്വാദു = മധുരം, കഷായം = ചവർത്തത്, കടുകം = എരിച്ചത്) एते रसाश्च विप्रादिक्रमतः स्मृता इत्यर्थः।।३२।।

विवरणम्।

अथ वर्णभेदतो भूलक्षणमाह - विप्रादिक्रमत इति। इषुः शरस्तम्बः। सिन्धुरो गजः। विस्तारादष्टमषष्ठचतुर्थांशैरधिकायामाः क्षत्रियादिभूमयः। मेचका कृष्णा। असृग्

---

१. 'क्ता। तथाच प्रसिद्धेर्वा' घ. पाठः, २. 'त्र धार्थः...द्धेर्वा', ३. 'दि', ४. 'मेण स्मृ' ग. पाठः

Shripuram Publications
www.shripuram.org

रुधिरम्। आसवस्सुरा। आमोदस्सौरभ्यम्।।३२।।

सङ्कीर्णरूपा वसुधात्र वर्णैर्गन्धै रसर्वाखिलवर्जनीया।
एनामनालक्षितवर्णचिह्नां नक्तं परीक्षेत निमित्ततश्च।।३३।।

विमर्शिनी।

वर्णसाङ्कर्ययुक्ता सर्ववर्णैर्वर्जनीयेत्याह - सङ्कीर्णेति। अत्र भूपरीक्षायाम्। वर्णैः रूपैः। गन्धै रसैः। वाशब्देन कुशादिभिः समचतुरश्रादिसंस्थानभेदैश्च। सङ्कीर्णरूपा मिश्रिता वसुधा अखिलवर्जनीया सर्ववर्णैस्त्याज्या। चिह्नराहित्ये कथमित्यत्राह - एनामिति। अनालक्षितवर्णचिह्नाम् अपरिस्फुटवर्णलक्षणयुक्ताम्। एनां वसुधाम्। नक्तं रात्रौ। निमित्ततः वक्ष्यमाणनिमित्तेनापि। परीक्षेत परीक्ष्य जानीयात्।।३३।।

विवरणम्।

वर्णिनामेव भूमिस्तत्तद्भेदव्यामिश्रणादनुलोमजसूतभूमिरपि स्यात्। वर्णैर्गन्धैरिति। सजातीयसङ्करे तु दोष इति भावः। वर्णाद्युपादानाच्च कुशादिसङ्करे तु न दोषः। अखिलवर्जनीयेति। ब्राह्मणादिसर्ववर्णैरनुलोमसूतैरपि हेयेत्यर्थः। मानुषीं परीक्षामुक्त्वा दैवीं परीक्षामाचष्टे - एनामिति।।३३।।

उपलिप्य महीतलेऽवटे घटमामं भृतधान्यकं न्यसेत्।
तदुपर्यपि वर्धमानकं न्यसतु प्राग्वदनो मृदात्मकम्।।३४।।

विमर्शिनी।

परीक्षणरीतिमाह - उपलिप्येति। महीतलेऽवटे गर्ते गोमयजलेनोपलिप्य प्राग्वदनो मन्त्री मूलमन्त्रं जपन् मृदात्मकं मृण्मयम् आममपक्वं घटं कलशं न्यसेत्। तदुपरि मृदात्मकं वर्धमानकं शरावं न्यसतु।।३४।।

विवरणम्।

अवटे हस्तमात्रखाते। आममपक्वम्। भृतधान्यकं यवमुद्गादिभिर्बीजयोचितैर्धान्यैरापूरितम्। वर्धमानकं शरावम्। मृदात्मकमिति। न लौहम्। प्राग्वदनग्रहणात् सामान्यसिद्धोऽनुष्ठानक्रमोऽपि गम्यते। पूर्वमात्मनः सकलीकरणादि कृत्वा गणपतिं प्रदीपं च सम्पूज्य

Shripuram Publications
www.shripuram.org

अवलिप्तेऽवटतले स्वस्तिकाद्यालिख्याक्षतं निक्षिप्य तत्र घटं शरावं च न्यग्बिलं सादयित्वेत्यादि ।।३४।।

कपिलाघृतमात्ममूलतः शतसञ्जप्तममुत्र सिञ्चतु ।
चतसृष्वपि दिक्षु वर्तिकास्तनुयाद् वर्णवशात् सितादिकाः ।।३५।।

विमर्शिनी ।

अमुत्र शरावे । आत्ममूलतः स्वस्वमूलमन्त्रेण । शतसंजप्तं शतवारं संजप्तम् । कपिलाघृतम् कपिलवर्णायाः पशोर्घृतम् । सिञ्चतु पूरयतु । वर्णवशाद् द्विजादिवर्णक्रमेण । पूर्वादिचतसृषु दिक्ष्वपि सितादिकाः श्वेतरक्तपीतकृष्णवर्णाः वर्तिकाः वर्तीकृतांस्तन्तून् तनुयात् ।।३५।।

विवरणम् ।

सितादिका इति । "श्वेतापाटलपीतमेचकरुचः" इति ह्युक्तम् ।।३५।।

प्रज्वाल्य दिश्यस्वकमूर्तिभिस्तास्ततः समभ्यर्चयतु क्रमेण ।
देवं निजं वाथ दिवाकरं वा विज्ञापयेच्चैनमनेन मन्त्री ।।३६।।

विमर्शिनी ।

दिश्यस्वकमूर्तिभिः[१] दिग्भवाभिः स्वस्वमूर्तिभिः पूजापटले वक्ष्यमाणाभिः । ताः वर्तिकाः । क्रमेण पूर्वादिक्रमेण प्रज्वाल्य । ततः मध्ये निजं देवं, यं देवं स्थापयितुमेतत् करोति, तं देवमित्यर्थः । दिवाकरं सूर्यं वा समभ्यर्चयतु । अथ प्रसन्नपूजानन्तरम् । एनं देवम् । अनेन मन्त्रेण । विज्ञापयेत् प्रार्थयेत् ।।३६।।

विवरणम् ।

दिश्यस्वकमूर्तिभिरिति । दिश्याः दिक्षु भवाः । विष्णौ वासुदेवादयः, शिवे तत्पुरुषादय इति । तैर्मूर्तिमन्त्रैः । प्रागादिषु ज्वालाः प्रज्वाल्य तैरेव ताः पूजयेत् । निजं देवं वेति । समभ्यर्चयत्विति सम्बन्धनीयम् । मन्त्रीति तत्तन्मन्त्रपूर्वं विज्ञापनमुक्तम् ।।३६।।

निमित्तं ब्रूहि मे देव! कल्पप्रोक्तं द्विजादिकम् ।
वर्णार्थं तु प्रयुक्तेऽस्मिंस्ततो वर्तिचतुष्टये ।।३७।।

---

१. 'दि' ग. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी।

मन्त्रं पठति - निमित्तमित्यादि।।३७।।

आच्छाद्य नीतेऽत्र मुहूर्तमात्रे
यस्योज्ज्वलेद् वर्तिरमुष्य सा भूः।
दीप्तासु सर्वास्वनुवर्णयोग्या
त्याज्या विशीर्णासु समस्तवर्णैः।।३८।।

विमर्शिनी।

फलकादिभिराच्छाद्य मुहूर्तमात्रे काले नीते अतीते। अत्र एषु वर्णेषु यस्य वर्तिरुज्ज्वलेद्, अमुष्य वर्णस्य सा भूर्भवति। सर्वासु वर्तिषु दीप्तासु सतीषु अनुवर्णयोग्या सर्ववर्णं प्रति योग्या। विशीर्णासु अनुज्ज्वलितासु समस्तवर्णैस्त्याज्या भवति।।३८।।

विवरणम्।

विशीर्णासु उपशान्तासु वर्तिषु। कदाचित्तु विशेषः। यदुक्तम् -

"अथ सर्वा विशीर्णास्ताः पुनः प्र(ज्वाल्य? ज्वलि)ता अपि।

वर्जनीया तु सा नित्यम्"

इति।।३८।।

कर्पूरागरुनालिकेरतिलकैर्दर्भैः कदम्बार्जुनै-
र्मालेयैः क्रमुकेक्षुकेतककुशैः कुन्दारविन्दोत्पलैः।
पूर्वोदक्प्लवशालिनी बहुजला वा या दरीदृश्यते
सेयं शान्तिकरी सुरेशयजने सूक्ता सुपद्मा मही।।३९।।

विमर्शिनी।

एवं वर्णवशाद् भूमेर्लक्षणमुक्त्वा कामवशादप्याह - कर्पूरेति। या मही कर्पूरादिभिरुपलक्षिता दरीदृश्यतेऽत्यर्थं दृश्यते, सेयं सुपद्मा नाम। सुरेशयजने देवं प्रतिष्ठाप्य यजनात् शान्तिकरी दुरितरोगानर्थादिशान्तिकरी। सूक्ता आगमेष्वभिहिता। कर्पूरः स एव। (അഗരു=അകിൽ, തിലകം=മൈലള്ളു, കദംബം=കടമ്പ്,

www.shripuram.org
Shripuram Publications
www.shripuram.org

അർജ്ജുനം=മരുത്, മാലേയം=ചന്ദനം, കേതകം=കൈത, കന്ദം=കുരുക്കുത്തിമുല്ല) पूर्वोदक्प्लवशालिनी पूर्वभाग उदग्भागे च निम्नतया युक्ता। बहुजला वा अक्षयजलयुक्ता वा।।३९।।

विवरणम्।

अथ फलभेदेनापि भूलक्षणमाह - कर्पूरेति। पूर्वोदक्प्लवशालिनीति। प्राक्प्लवेनोदक्प्लवेनेशानप्लवेन वा युक्तेत्यर्थः। दरीदृश्यते[1] अत्यर्थं दृश्यत इत्यर्थः। सुरेशयजनं प्रतिष्ठापनम्।।३९।।

तीरं वारिनिधेः श्रिताथ सरितस्तीर्थस्य वा दक्षिणे
व्रीहिक्षेत्रविचित्रिताप्यदिशि यज्ञार्हाङ्घ्रिपैराङ्किता।
कीर्णा पूर्णफलप्रसूनतरुभिर्योद्यानहृद्यापि वा
भद्रा सा परिगीयते वसुमती प्रीतिप्रदा यज्वनाम्।।४०।।

विमर्शिनी।

या पुनरेवंभूता वसुमती भूमिः, सा भद्रा परिगीयते भद्रेत्यागमेषूच्यते। यज्वनां प्रीतिप्रदा इष्टदा। वारिनिधेः समुद्रस्य तीरं श्रिता आश्रिता। अथवा सरितो नद्यास्तीर्थस्य प्रसिद्धस्य तीर्थस्य तीरं श्रिता। दक्षिणे दक्षिणभागे। व्रीहिक्षेत्रविचित्रिता व्रीहिक्षेत्रेण संयुक्ता। आप्यदिशि पश्चिमभागे। यज्ञार्हाङ्घ्रिपैः पलाशादिभिर्यज्ञयोग्यैर्वृक्षैरङ्किता चिह्निता। पूर्णफलप्रसूनतरुभिः फलपुष्पपूर्णैर्वृक्षैः। कीर्णा सङ्कीर्णा। अपि वा उद्यानहृद्या उद्यानवद्धृद्या।।४०।।

विवरणम्।

अथ सरितस्तीर्थस्य वेति। तीरं श्रितेत्यनुषङ्गः। यज्ञार्हा अङ्घ्रिपाः पलाशविकङ्कतादयो वृक्षाः। कीर्णा व्याप्ता।।४०।।

प्लक्षन्यग्रोधनिम्बार्जुनवकुलकुलस्थासनाशोकनिष्पा-
वाङ्कोलैर्मालतीचम्पकतिलखदिरैः कोद्रवैर्मुद्रिता वा।
भूमिर्या भूधराधीश्वरशिखरगता पार्श्वसंस्थाथवाद्रेः
पूर्णा सा पुष्टिदात्री सुरनिलयसमाकल्पने स्वल्पतोया।।४१।।

---

१. 'त इति। दृशर्यङि रूपम्। स्पष्टतरं दृश्यते अ' ग. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी।

या च पुनरेवंभूता भूमिः सा पूर्णा स्यात्। सुरनिलयसमाकल्पने देवालयनिर्माणे। पुष्टिदात्री धनधान्यप्रदानशीला। प्लक्षन्यग्रोधनिम्बार्जुनवकुलकुलस्थासनाशोकनिष्पा-वाङ्कोलैः (പ്ലക്ഷം=ഇത്തി, ന്യഗ്രോധം=പേരാൽ, നിംബം=വേപ്പ്, അർജുനം=മരുത്, വകുളം=ഇലഞ്ഞി, കുലസ്ഥം=മുതിര, അസനം =വേങ്ങ, അശോകം=സ്വയമേവ, നിഷ്പാവം=തുവര, അങ്കോലം=അഴി ഞ്ഞിൽ) एतैर्मुद्रिता अङ्किता वा। मालतीचम्पकतिलखदिरैः (മാലതി=മുല്ല, ചമ്പകം=സ്വയമേവ, തിലം=എള്ള്, ഖദിരം=കരിങ്ങാലി) कोद्रवैर्वा (കോദ്രവം=വരക്) एतैर्वा। भूधराधीश्वरशिखरगता भूधराधीश्वरः पर्वतश्रेष्ठः तस्योर्ध्वभागस्था वा। अथवा अद्रेः पर्वतस्य पार्श्वस्थिता वा। स्वल्पतोया सुतरामल्पं तोयं यत्र सा।।४१।।

विवरणम्।

मुद्रिता अङ्किता।।४१।।

अर्कैर्वेणुविभीतकैः स्नुहियुतैः श्लेष्मातकैः पीलुभिः
संकीर्णा बहुशर्करा च कठिना गर्भान्विता सोषरा।
गृध्रश्येनवराहवायसशिवाशाखामृगैः सन्ततं
जुष्टा यष्टुरनिष्टदा निगदिता धूम्रा मही सूरिभिः।।४२।।

विमर्शिनी।

या तु पुनरेवंभूता मही, सा सूरिभिर्विद्वद्भिः धूम्रा निगदिता उक्ता। यष्टुः यजमानस्यानिष्टदा दुःखदा। अर्कैः सङ्कीर्णा। (അർക്കം=എരിക്ക്) वेणुविभीतकैः वेणुभिर्विभीतकैश्च। (വേണു=മുള, വിഭീതകം=താന്നി) स्नुहियुतैः श्लेष्मातकैः (സ്നുഹി=കള്ളി, ശ്ലേഷ്മാതകം=നറുവരി) पीलुभिः (പീലു=ഉകം) एतैर्वा। बहुशर्करा च बह्व्यः शर्करा यत्र सा। कठिना कर्कशा। गर्भान्विता गुहायुक्ता। सोषरा ऊषरयुक्ता। गृध्रश्येनवराहवायसशिवाशाखामृगैः (ഗൃധ്രം=കഴുകു, ശ്യേനം=പരുന്ത്, വരാഹം=പന്നി, വായസം=കാക്ക, ശിവാ=കുറുനരി, ശാഖാമൃഗം=കുരങ്ങ്) एभिः सन्ततं सदा जुष्टा सेविता। एवंभूता मही वर्ज्येत्यर्थः।।४२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्।

शिवा गोमायवः। शाखामृगा वानरा इति।।४२।।

आचार्योऽथ यथोचितां वसुमतीं लब्ध्वा निशायां समिष्टात्माभ्यर्च्य गणेशमस्त्रमनुनाराध्य स्वधित्यादिकम्। प्राकारावधिकां प्रकल्प्य परितस्तां देवताभ्योणुना मध्येऽष्टासु च भूतकूरहविषा दिक्षु प्रदद्याद् बलिम्।।४३।।

विमर्शिनी

एवं भूलक्षणं भूपरीक्षाविधानं चोक्त्वा भूपरिग्रहविधानमाह - आचार्य इति। अथशब्द आरम्भार्थः। अथ आचार्यः यथोचितां यथायोग्याम्। वसुमतीं प्रशस्तां भूमिं लब्ध्वा। निशायां रात्रौ क्वचित् प्रदेश उपविश्य। समिष्टात्मा शङ्खपूरणानन्तरमात्मानमिष्ट्वा। गणेशं गुरुगणेशदीपानभ्यर्च्य अग्रतः स्वस्तिकस्थं स्वधित्यादिकं खड्गपरश्वादिकम्। अस्त्रमनुना स्वस्वास्त्रमन्त्रेण आराध्य। प्राकारावधिकां महामर्यादाप्राकारावसानभूतां तां भूमिं प्रकल्प्य। देवताभ्योणुना 'देवताभ्य' इति मन्त्रेण। मध्ये भूप्रदेशस्य मध्ये। परितोऽष्टासु दिक्षु च। भूतकूरहविषा भूतकूरयुक्तेन हविषा। बलिं प्रदद्यात्।।४३।।

विवरणम्।

एवं परिग्राह्यां भुवमुक्त्वेदानीं तत्परिशोधनप्रकारमाह - आचार्योऽथेति। वसुमती भूमिः लब्ध्वेति। प्रतिष्ठोचिततयावरोधो लाभः। यद्वा तत्र प्रवेशसमये सकृद्भाविप्राकारसीमपर्यन्ते प्रदक्षिणेन तस्याः परिग्रहो लाभः। निशायां बलिं प्रदद्यादिति सम्बन्धः। समिष्टात्मेति। आत्मनः सकलीकरणादिकमुक्तम्। स्नानाद्यर्थसिद्धम्। दृष्ट्यादिपरिमिते आयतने नैर्ऋतोद्देशे क्लृप्ते स्थण्डिले उपविश्यैतत्सकलीकरणादि कार्यम्। स्वधित्यादिकमिति वृक्षशिलागुल्मादिशोधनौपयिकशस्त्राणां ग्रहणम्। तेषामस्त्रप्रोक्षणशोषणादि सर्वमप्यर्थसिद्धम्। तां परितः प्राकारावधिकां प्रकल्प्येत्यन्वयः। तां वसुमतिं दृष्टिपरिमित्या वंश्यादिपरिमित्या वा कथंचिदवधारणमिह कल्पनम्। देवताभ्योणुनेति। 'देवताभ्यः पितृभ्योऽथे'त्यनेन मन्त्रेणेत्यर्थः। भूतकूरहविषेति। वक्ष्यति च - 'हारिद्रं दधिलाजसक्तुपललाढ्यं भूतकूराह्वयम्" इति बलिप्रक्रियोत्सवे द्रष्टव्या। प्रवेशबलिरयं भवति।।४३।।

Shripuram Publications
www.shripuram.org

देवताभायः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः।
एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः।।४४।।

विमर्शिनी।

बलिमन्त्रं पठति - देवताभ्य इति।।४४।।

***आचम्य सम्यक् सकलीकृतात्मा**
कृतात्मरक्षो रचिताञ्जलिः सन्।
मध्ये स्थितस्तत्स्थित[1]भूतजातं
प्रवासयेतेति निवेदयंस्त्रिः।।४५।।

विमर्शिनी।

अथ आचम्य सकलीकृतात्मा सम्यक् कृतात्मरक्षः कृता आत्मरक्षा येन सः। मध्ये स्थितस्तिष्ठन्। रचिताञ्जलिः सन् भूत्वा। इति वक्ष्यमाणमन्त्रेण। त्रिः त्रिशः निवेदयन्। तत्स्थितभूतजातं भूतसमूहम्। प्रवासयेत वियोजयेत।।४५।।

विवरणम्।

मन्त्रीति प्रतिष्ठापनीयदेवमन्त्राभिज्ञत्वमुक्तम्। कृतात्मरक्ष इति सुदर्शनाद्युदितास्त्र-मन्त्रन्यासजपभावनातालत्रयादिभिरात्मरक्षणमुक्तम्। तत्स्थितभूतजातमिति। त्रिर्निवेदयन् प्रवासयेतेति योजना। इतिशब्दो वक्ष्यमाणमन्त्राभिप्रायः। त्रिरिति मन्दमध्यमताराभिप्रायम्। प्रवासयेतेति। मन्त्रान्तरे पुष्पेणोद्वासनमुद्रया आकाशे समुद्वासनमभिप्रेतम्। यद्वा पुनरस्त्रेणोद्वासनमिष्यते। यदुक्तम्-

"इत्यनुज्ञाप्य भूतादीन् पुष्पमस्त्रेण खे क्षिपेदि"ति।।४५।।

भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन।
ते सर्वे व्यपगच्छन्तु स्थानं कुर्यामहं हरेः।।४६।। इति।।

विमर्शिनी

प्रार्थनामन्त्रं पठति - भूतानीति।।४६।।

---

१. 'त्कृतवासभूतप्रवासनायेति निवेदयेत् त्रिः' इति मूलकोशपाठः

* 'आचम्य मन्त्री' इति विवरणरीत्या पाठः प्रतिभाति।

www.shripuram.org
Shripuram Publications
www.shripuram.org

यद्यदर्थमिह गृह्यते मही तत्पदं हरिपदेऽत्र योजयेत्।
स्कन्दभूतपतिसुम्भजित्सु येयेत्रदेवपदपूर्वतोऽर्थयेत्।।४७।।

विमर्शिनी।

इह यद्यतर्थं यस्य यस्य देवस्य कृते। मही गृह्यते। अत्र मन्त्रे। हरिपदे हरेरिति पदे। तत्पदं तस्य तस्य देवस्य नाम योजयेत्। स्थानं कुर्यां कपर्दिनः, स्थानं कुर्यां हरीशयोः, स्थानं कुर्यां गणेशितुः इति योजयेदित्यर्थः। स्कन्दभूतपतिसुम्भजित्सु स्कन्दे शास्तरि दुर्गायां च। क्रमेण येयेत्रदेवपदपूर्वतः येपदपूर्वो येत्रपदपूर्वो देवपदपूर्वश्च, येयेत्रदेवपदपूर्वाः तैस्तैः। अर्थयेत् प्रार्थयेत्।।४७।।

विवरणम्।

अत्र हरिपद इति। युक्तितः ज्ञेयम्। यथा - स्थानं कुर्यां हरीशयोरित्यादि। येयेत्रदेवपदपूर्वत इति त्रयाणां प्रतीकग्रहणम्।।४७।।

ये वसन्ति वने त्वत्र भूताः प्रेताश्च राक्षसाः।
कूश्माण्डाश्च पिशाचाश्च वेताला ब्रह्मराक्षसाः।।४८।।

निर्गच्छन्त्वन्यत; शीघ्रमितः क्रूराः सुखं पुनः।
भवनं कुर्महे त्वत्र गुहस्य परमात्मनः।।४९।।

येऽत्राशुभकराः सन्ति भूतवेतालराक्षसाः।
व्यपगच्छन्तु ते शास्तुः कुर्महे भवनं त्विह।।५०।।

देवदानवगन्धर्वपिशाचाश्चापि राक्षसाः।
नागाः सर्पास्तथा कीटा येऽत्र तिष्ठन्ति जन्तवः।।५१।।

ते सर्वेऽन्ये च जानन्तु प्रयान्त्वस्माद् यथासुखम्।
देव्यर्थं प्रतिगृह्णामि सास्माकं क्षम्यतामिति।।५२।।

विमर्शिनी।

प्रार्थनामन्त्रान् पठति - ये वसन्तीत्यादि।।४८-५२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्।

तानेव क्रमेणाह - ये वसन्तीति। क्षम्यतामितीति। अत्रेतिशब्दो मन्त्रपरिसमाप्त्यर्थ एव। वृत्तानुरुरुत्सायां क्षम्यतामपीत्येवमेषणीयम्।।४८-५२।।

तद्वृक्षगुल्मादिकमिष्टशस्त्रै-
रुच्छिद्य संशोध्य निजास्त्रजापि।
क्षमां क्षमीकृत्य दिशश्च सम्यग्
ज्ञात्वेष्टयुक्त्या प्रमिमीत चैनाम्।।५३।।

विमर्शिनी

ततो निजास्त्रजापी स्वस्वास्त्रमन्त्रं जपन्। इष्टशस्त्रैः पूजितैः खड्गादिभिः। तद्वृक्षगुल्मादिकं तत्रत्यवृक्षवनगह्वरादिकम्[1]। उच्छिद्य संशोध्य। क्षमां क्षमीकृत्य समीकृत्य। दिशः सम्यक् शङ्कुस्थापनपूर्वकं ज्ञात्वा। एनां भूमिम्। इष्टयुक्त्या स्वेच्छायोगेन। प्रमिमीत मानं कुर्यात्।।५३।।

विवरणम्।

इष्टशस्त्रैरिति। पूजितैः स्वधित्यादिभिः। उच्छिद्येत्युपरिच्छेदनं समूलोन्मूलनमप्युक्तम्। संशोध्येति। विषमप्रस्तरादिपरि[2]हीणत्वमुक्तम्। तृणादि संशोधनं तु कर्षणे कृत एव वा स्यात्। यद्वा संशोध्येति कर्षणादिशोधनमप्युक्तम्। यदुक्तम्-

"शतशः कर्षयित्वा च गोकुलं तत्र वासयेत्।
ततो वर्षोषितां कृत्वा तिलादीन्यत्र वापयेत्।।
यदा सस्येषु पुष्पाणि फलान्यपि भवन्ति हि।
तदा कृष्टा पुनर्भूमिः शुद्धिमृच्छत्यसंशयम्।।"

इति। क्षमां क्षमीकृत्येति। तां भुवं देवायतनयोग्यां कृत्वेत्यर्थः। भूमेर्ऋजूकरणांद्यभिप्रायमेतत्। दिशश्च सम्यग्विज्ञायेति। तत्र समतले शङ्कुन्यासादिभिर्दिगवधारणं तत्स्थैर्यसिद्धये जगति क्षेत्रबाह्यतः शिलासु तद्दिग्रेखोत्किरणं चोक्तम्। शङ्कुन्यासस्तु कर्मशेषे वक्ष्यते। एनामिष्टयुक्त्या प्रमिमीत चेति। बिम्बजन्यस्वतन्त्रो वा प्रासादः। तदीयदण्डेन प्राकारपर्यन्ता भूमिः प्रमातव्या। ततश्च बिम्बस्य प्रासादस्य वा स्वेष्टमानकल्प्यत्वम्। तदुपपत्त्या च भूमिमानमिति। सर्वं चैतद् द्वितीयपटले वक्ष्यते।।५३।।

---

१. 'शबरा', २. 'रिहरणमु' ग. पाठः

Shripuram Publications
www.shripuram.org

पुन्नामैकतरूद्भवान् करमितांस्तत्पादनाहान् दृढान्
शङ्कून् प्राग्वदनोऽस्त्रमन्त्रमहितान् मध्यादिशर्वान्तिमम्।
कृत्वा कल्पितसालसीम्नि परितः शङ्कुद्विसंवेष्टितं
स्वास्त्रेण प्रविसार्य सूत्रमपि गृह्णातु क्षितिं सर्वतः।।५४।।

विमर्शिनी।

पुनः सर्वतः सर्वदेवेषु। प्राग्वदनः प्राङ्मुखो भूत्वा। मध्यादिशर्वान्तिमं मध्ये पूर्वाद्यष्टदिक्षु च। पुन्नामैकतरूद्भवान् एकस्मादेव तरोर्वृक्षादुद्भवान्। (പുന്നാഗം=പുന്ന) करमितान् करपरिमितदीर्घान्। तत्पादनाहान् षडङ्गुलपरिधियुक्तान्। अस्त्रमन्त्रमहितान् पूर्वमेवास्त्रमन्त्रेण पूजितान्। दृढान् शङ्कून् स्वास्त्रेण कृत्वा स्थापयित्वा। परितः कल्पितसालसीम्नि कल्पितप्राकारावधौ। सूत्रमपि त्रिगुणितं सूत्रम्। शङ्कुद्विसंवेष्टितं शङ्कौ शङ्कौ द्विद्विसंवेष्टितं यथा भवति तथा। स्वास्त्रेण प्रविसार्य अविच्छिन्नं प्रसार्य। क्षितिं गृह्णातु परिगृह्णीयात्।।५४।।

विवरणम्।

एवं भूसंस्कारमुक्त्वेदानीं तत्परिग्रहमाचष्टे - पुन्नामैकतरूद्भवानिति। पुन्नागनागादयः पुन्नामानस्तरवः । न द्विवृक्षजा बहुवृक्षजा वैते शङ्क्वादयः स्युरित्येकग्रहणम्। करमितान् हस्तमात्रायतान्। तत्पादनाहस्तेषां परिणाहः। नाहग्रहणाद् वृत्तत्वमपि लभ्यते। तदनभिधानं तु चतुरश्रविकल्पनार्थम्। यदुक्तम् -

"अधोमूलोर्ध्वशाखास्तु चतुरश्राश्च वर्तुलाः"

इति। तन्निशायामेव चेद् एवं स्यात्। दिनान्तरे तु चेत् स्नानसकलीकरणाद्यपि प्राग्वत् कार्यमेव। अग्रतो दर्भसंस्तरे शङ्कून् मुद्गरं त्रिगुणसूत्रं च संसाद्यास्त्रप्रोक्षणशोषणादि-पूर्वकमस्त्रार्चनादिभिर्मन्त्रणं कार्यम्। प्राग्वदनः प्राङ्मुखः। प्राग्वाद्यवादनमप्यनेनोक्तम्। यद्वा वदति शङ्कुताडनतः शब्दं करोतीति वदनो लोहमुद्गरः। प्राङ्मुखतया वदनो यस्येति समासः। मध्यादिशर्वान्तिममिति। प्रासादमध्योद्देशे पूर्वकल्पितप्राकारसीमनि तु पूर्वाद्यष्टदिक्षु चेति भावः। पूर्वादिशर्वान्तिममिति वा पाठः। *मित्वेति भूमावग्रप्रवेशनेन स्थापयित्वेत्यर्थः। मुद्गरेणाष्टधा ताडनेन कार्यमेतत्। सुलग्ने चैतदिष्यते। तदुक्तम् -

* कृत्वेत्यस्य स्थाने मित्वेति विवरणपाठः। (मिञ् प्रक्षेपणे)

Shripuram Publications
www.shripuram.org

"भूपरिग्रहार्थं कर्षणार्थं खननार्थं प्रथमेष्टकार्थं गर्भाधानार्थं प्रतिमाद्रव्यसङ्ग्रहार्थं देवप्रतिष्ठापनार्थम्" इति। स्वास्त्रेणेति सर्वत्र सम्बध्यते। शङ्कुद्विसंवेष्टितं सूत्रमपि प्रसार्येति। सूत्राग्रं मध्यशङ्कौ प्राच्यशङ्कौ वा द्विगुणपरिवेष्टनेन बद्ध्वाग्निकोणान्तं प्रसार्य आग्नेयशङ्कौ द्विगुणपरिवेष्टनेन बद्ध्वेत्यादि बोद्धव्यम्। सर्वत्रान्ततस्तालत्रयादि कार्यमिति सामान्यसिद्धम्। गृह्णातु क्षितिं सर्वत इति। एवमुक्तो भूपरिग्रह इत्यर्थः। यद्वा भूपरिग्रहबुद्ध्या सकृत् प्रदक्षिणकरणमनेनोक्तम्।।५४।।

आचार्यो मनुभावितोऽह्नि सुशुभे लग्ने वृषाभ्यां मिथ-
स्तुल्याभ्यामसनादिजैर्हलयुगाद्यैर्दर्भमालासितैः।
प्रागास्यो मिहिरार्णतस्त्रिरथवा कृष्ट्वा क्षितिं पञ्चधा
मुद्गादीनि समुप्य मूलमनुना सिञ्चेज्जितन्ताणुना।।५५।।

विमर्शिनी

एवं भूमिं परिगृह्यापरस्मिन् मुहूर्ते तस्याः संस्कारं कुर्यादिति वदन् पूर्वं विष्णौ विशेषमाह - आचार्य इति। आचार्यः सुशुभेऽह्नि सुशुभे लग्ने राशौ। मनुभावितः सकलीकरणात्माराधनकृद् भूत्वा। असनादिजैः असनवृक्षादिकृतैः। (അസനം=വേങ്ങ) हलयुगाद्यैः हलयुगयष्ट्यादिभिः। (ഹലം=കരിവി, യുഗം=നുകം) दर्भमालासितैः दर्भपाशेन बद्धैः उपलक्षिताभ्यां मिथः अन्योन्यं तुल्याभ्यां वृषाभ्याम्। प्रागास्यः प्राङ्मुखो भूत्वा। मिहिरार्णतो द्वादशाक्षरं जपन्। त्रिः त्रिधा अथवा पञ्चधा क्षितिं कृष्ट्वा। 'कृषि लेखन' इति धातुः। मुद्गादीनि बीजानि मूलमनुना समुप्य वपनं कृत्वा। जितन्ताणुना सिञ्चेत्।।५५।।

विवरणम्

प्राक्परिग्रहाभावे चैतत् कर्षणं प्रस्तौति - *स्नातो गुरुरिति। स्नात्वा गुरुरिति वा पठनीयम्। मन्त्रविदिति। वृषादिपूजने प्रणवो योजने मूलं यष्ट्या ताडने फडन्तप्रणव

---

* 'आचार्यो' इत्येतत्पद्यस्थाने

स्नातो गुरुर्मन्त्रविदञ्चितात्मा शुभेऽह्नि संस्कृत्य वृषौ सुतुल्यौ।
अयुक्तपूर्वावसनादिक्लृप्तं हलादि मुद्गादि च बीजजातम्।।
बद्ध्वालङ्कृतयोर्नवं युगहलाद्युक्ष्णोस्तयोर्योगवित्
तिष्ठन् पश्चिमतोऽत्र दर्भमयमालाभिः सुलग्ने ततः।
प्रागास्यो मिहिरार्णतस्त्रिरथवा कृष्ट्वा क्षितिं पञ्चधा
बीजानीह समुप्य मूलमनुना सिञ्चेज्जितन्ताणुना।।

Shripuram Publications
www.shripuram.org

इत्यादि सर्वं विद्वानित्यर्थः। अञ्चितात्मेति स्नानादिपूर्वकं सकलीकरणादिकमुक्तम्। तत्र पश्चिमत उपविश्यैतत्सर्वं कार्यम्। संस्कृत्येति क्षालनपूर्वकमस्त्रप्रोक्षणादिकमुक्तम्। सुतुल्याविति। मिथः सुसदृशौ वर्णतो यजमानस्य सुसदृशौ।

"श्वेतौ रक्तौ च कपिलौ कृष्णौ जात्यनडुत्क्रमात्"

इति। अयुक्तपूर्वौ पूर्वमन्यत्र वाहनकर्षणादावयोजितौ। असनादिक्लृप्तं हलादीति। सामान्यतोऽसनाश्वत्थवटादिकृतम्। वर्णवशात्तु पलाशादिकृतम्।। यदुक्तम् -

"हलं युगं च पालाशं ब्राह्मणस्य विधीयते।
न्यग्रोधं क्षत्रियस्य स्यात् प्लाक्षं विट्शूद्रयोर्भवेत्।।"

इति। आदिशब्देन युगशम्यालाङ्गलयष्टिग्रहणम्। मुद्गादि बीजजातमिति मुद्गतिलसर्षपग्रहणं, सर्वधान्याभिप्रायं वा। वक्ष्यति च - सर्वौषधानि यवमाषेत्यादि-सप्तधान्यानि निजनिजबीजवापोक्तानि वा ग्राह्याणि। चकारः संस्कृत्येत्येतदनुकर्षणार्थः।।

बद्ध्वेति। तयोरुक्ष्णोर्युगहलाद्यं दर्भमालाभिर्बद्ध्वेत्यन्वयः। अलङ्कृतयोरिति। हिरण्मयशृङ्गखुरादिभिर्गन्धमाल्यादिभिश्च शक्तितोऽलङ्करणमुक्तम्। योगविदिति। युगहलादियोजनाभिज्ञत्वमुक्तम्। वाद्यप्रयोगविदिति वार्थः। यद्वा योगो ध्यानविशेषः। यदुक्तम् - 'भूसरोजे च मां ध्यायेद्' इति। तं देवं ध्यायेदिति च तदर्थः। पश्चिमतस्तिष्ठंस्ततः प्रागास्यस्त्रिः कृष्ट्वेत्यन्वयः। प्रागवधि सकृत्कर्षणं कृत्वा पुनः प्रादक्षिण्येन कृषन् पश्चादवधि गत्वा पुनर्द्वितीयं प्रागवधि कृषेदित्यादि बोद्धव्यम्। तदुक्तम् -

"त्रिपञ्चसप्तमार्गेण कर्षयेच्च प्रदक्षिणम्"

इति। स्थलविस्तारापेक्षया सङ्ख्याधिक्यम्।

"पञ्चधा दशधा चापि कर्षयेल्लाङ्गलेन तु।"

इति च। यावदन्तं मण्डलमिष्यते तावदवश्यं कर्षणीयम्। पुनर्दक्षिणतोऽपि प्रक्रम्य तथोदगवधि प्रादक्षिण्येन कर्षणम्। यदाह - 'प्राङ्मुखो वाप्युदङ्मुखः कर्षयेदि'ति। सुलग्न इति। गोहिरण्यादिदानमपीष्यते। कर्षणे कृते तदायतनेऽस्त्रप्रोक्षणमप्युचितम्। इहेति। कृष्टायां भूमौ। जितन्ताणुना सिञ्चेदिति। तत्र यावदर्थमालवालान् विधाय

इति श्लोकद्वयपाठमवलम्ब्य प्रवृत्तं विवरणव्याख्यानम्। अमुमेव पाठमङ्गीकृत्य गर्तवनस्थ (Kuzhikkattu) तन्त्रसमुच्चयकेरलभाषाव्याख्यापि प्रवृत्ता। परन्तु पूर्वस्मिन् पद्ये 'स्नातो गुरुः' इत्यस्य 'ततो गुरुः' इति 'वृषौ सुतुल्यौ' इत्यस्य 'वृषौ तु तुल्यौ' इति चादृत पाठभेदः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

जितन्तेन सेचनं कार्यम्। ततः प्रतिदिनं यावत्फलनिष्पत्ति सेचनमपि कार्यम्।।५५।।

चक्रेण संरक्ष्य फलान्वितानि
गोब्रह्मसात्कृत्य च गा निवास्य।
क्ष्मां साधयेदित्यजिते विधिः स्यात्
तदन्यदेवेषु भिदां वदामि।।५६।।

विमर्शिनी

चक्रेण सुदर्शनमन्त्रेण। संरक्ष्य वृतिं कृत्वा। फलान्वितानि फलिते सति तानि बीजानि। गोब्रह्मसात्कृत्य। 'विभाषा साति कात्स्न्र्ये' (५-४-५२) इति सातिप्रत्ययः। गोभ्यो ब्राह्मणेभ्यश्च दत्त्वा। गाश्च निवास्य तत्र गवां निवासं कृत्वा। क्ष्मां साधयेत्। एवं कृते सति क्ष्मा साधिता भवतीत्यर्थः। इत्यजिते विष्णौ विधिः स्यात्। तदन्यदेवेषु भिदां भेद वदामि।।५६।।

विवरणम्

चक्रेण संरक्ष्येति। समन्ताद् वृतिकल्पनं तालत्रयादिकं चोक्तम्। फलान्वितानि गोब्रह्मसात्कृत्येति। तानि बीजानि उत्पन्नानि फलान्वितानि गोभ्योऽर्ध्वं ब्राह्मणेभ्यश्चार्धं विभाज्य दद्यादित्यर्थः। तदधीनवचने सातिः। मूलमेव मन्त्रः। गा निवास्येति। एकदिनं त्रिदिनं वा तत्र गोकुलवास उक्तः। सम्भवे ब्राह्मणभोजनमपीष्यते।।५६।।

सद्यवामबहुरूपशिवास्यैः कर्षबीजवपनोक्षणरक्षाः।
स्पर्शनं च गिरिशे निजमूलेनाखिलं तदितरेषु विदध्यात्।।५७।।
हरीशेऽपि गिरीशोक्तक्रमाद् गुह्याणुभिर्निजैः।
कर्षणादिक्रियाः पञ्च कुर्यान्मूलेन वा गुरुः।।५८।।

विमर्शिनी

गिरिशे शिवे। सद्यवामबहुरूपशिवास्यैः सद्योजातवामदेवाघोरेशानतत्पुरुषसूक्तैः। कर्षबीजवपनोक्षणरक्षाः कर्षणं बीजवपनमुक्षणं रक्षणं च। स्पर्शनं च। 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनमि'त्यमरः। दानं विदध्यात् कुर्यात्। तदितरेषु देवेषु। तदखिलं

Shripuram Publications
www.shripuram.org

कर्म। निजमूलेन स्वस्वमूलमन्त्रेण विदध्यात्।।५७।।

गुरुः विशेषेण[१] ज्ञातुं शक्तः। हरीशेऽपि निजैर्गुह्याणुभिः पञ्चतत्त्वैः। गिरिशोक्तक्रमात् शिवोक्तमार्गेण। प्रतिलोम्याच्चतुर्थेन दानमित्यभिप्रायः। कर्षणादिपञ्चक्रियाः कुर्याद्, मूलेन वा सर्वमूलमन्त्रेण वा।।५८।।

विवरणम्

बहुरूपोऽघोरः। शिवः ईशानः। आस्यं तत्पुरुषः उक्षणं सेचनम्। स्पर्शनं गोब्राह्मणेभ्यो दानम्।।५७।।

गुह्याणुभिरिति स्वपञ्चतत्त्वग्रहणम्। गिरीशोक्तक्रमादिति। अन्त्यतुर्य मध्यमाद्या-द्वितीयक्रमेणेत्यर्थः। यद्वा शिवोक्तं ब्रह्मणां क्रममप्यनुरुध्येति। सद्योजातादितत्तद्ब्रह्मयोगोऽपि गुह्यमन्त्राणामुक्तः।।५८।।

खात्वा क्षितिं तां पुरुषप्रमाणं जलान्तमश्मावधि वा सुलग्ने।
पादोनमापूर्य विशुद्धवेद्यां रात्रौ यजेद् दिश्यथ वास्तुमैश्याम्।।५९।।

विमर्शिनी

अथ सुलग्ने शोभने मुहूर्तान्तरे। तां क्षितिं पुरुषप्रमाणं जलान्तमश्मावधि वा खात्वा पादोनं यथा तथा आपूर्य। विशुद्धवेद्यां मार्जनालेपनादिभिः विशुद्धायां वेद्याम्। ऐश्यां दिशि रात्रौ वास्तुं यजेत्।।५९।।

विवरणम्

एवमायतनभूमेर्बाह्यं संस्कारमुक्त्वा आन्तरं संस्कारमाह - खात्वेति। तां क्षितिं सुलग्ने पुरुषप्रमाणं खात्वा पादोनमापूर्याथ रात्रावैश्यां दिशि विशुद्धवेद्यां वास्तुं यजेदित्यन्वयः। स्नानसकलीकरणादि सर्वं सामान्यसिद्धम्। अस्त्रेण तत्संस्कृतखनित्रेण खननमर्थाद् भवति। पुरुषप्रमाणमित्युद्बाहुकपुरुषमात्रम्। पुरुषग्रहणं तदवयवोपलक्षणम्। तदुक्तम् -

"खात्वा पुरुषमात्रं तु कण्ठहृन्मात्रमेव वा।
तन्नाभिजानुमात्रं वा जलाश्मान्तमथापि वा।।"

१. 'षं ज्ञा' ग. पाठः

Shripuram Publications
www.shripuram.org

इति। ब्राह्मणादिवर्णवशाद्वा मुखबाहूरुजानुमात्रं स्यात्। भूम्यन्तर्गतशल्यपरिहारार्थं प्रासादीयस्थलदृढीकरणार्थं चैतत् खननम्। अत एवैतत् प्रासादाभ्यधिकततं स्यात्। तदुक्तम् -

"प्रासादस्य तु विस्ताराद् द्विहस्ताधिकविस्तृतम्।।"

इति। भुवो दृढीभावोपपत्त्या पुरुषप्रमाणादिविकल्पः। स्वतो दृढे तु स्थले शिलाप्रस्तरसम्भवे च यावदर्थं खननं स्यात्। पादोनमापूर्येति। पुरुषप्रमाणविषयमेतत्। शेषेष्वेतन्मानतुल्यं पूरणम्। यद्वा पादोनमिति पादशब्देन पुरुषपादप्रमाणग्रहणम्। तच्च हस्तमात्रम्। यत उक्तं 'हस्तमात्रं खनेद् विप्रः' इति। पूरणक्लृप्तिं तु वक्ष्यति - गर्तंमृत्तिकयेत्यादि। विशुद्धवेद्यां पादोनमापूर्येत्यपि वा योजनीयम्। खातमूलस्थलीमस्त्र-प्रोक्षणेनास्त्रगव्यसेचनेन च विशोध्य तत्रास्त्रप्रोक्षितमृदादिभिरापूरणं कार्यम्। विशुद्धवेद्यामिति मार्जनालेपनाभ्यां मुष्ट्यादिभिर्वा स्थलशुद्धिरुक्ता। स्नानसकलीकरणादि सर्वं सामान्यसिद्धम्।।५९।।

क्षेत्रे रन्ध्रंपुटे प्रकल्प्य नवकं मध्येऽस्य बाह्यावृतौ
षट्कं दिक्षु विदिक्षु युग्मयुगलं चैकैकशस्तद्बहिः।
तस्मिन्नर्पितदर्भके महितपीठे सादिवांवास्तुना
वास्तुं प्राक् पुरुषेण ङेनतिमता वामादिकाङ्गैर्यजेत्।।६०।।

विमर्शिनी

रन्ध्रपुटे आयामतो विस्तारतश्च दशभिः सूत्रपातैर्नवपुटं कृत्वा तत्र क्षेत्रे। मध्ये नवकं पदानां नवकं स्वस्तिकत्वेन प्रकल्प्य। अस्य नवकस्य। बाह्यावृतौ दिक्षु पदानां षट्कं, विदिक्षु युग्मयुगलं द्विकद्वयं, तत्राग्निवायुकोणयोः पूर्वापरायतमितरकोणयोर्दक्षिणोत्तरा-यतं च प्रकल्प्य। तद्बहिरेकैकशश्च पदानि प्रकल्प्य। अर्पितदर्भके दर्भान् विन्यस्य। तस्मिन् महितपीठे पूजित[1]पीठे। प्राक् प्रथमम्। सादिवांवास्तुना आदिवांवास्तुयुक्तेन। आदिः प्रणवः। ङेनतिमता चतुर्थ्येकवचननमोयुक्तेन। पुरुषेण पुरुष इति पदेन, 'ओं वां वास्तुपुरुषाय नमः' इति मन्त्रेण आवाह्य। वामादिकाङ्गैः वां हृदयाय नमः इत्याद्यङ्गैः सह वास्तुं यजेत्।।६०।।

---

१. 'ते' क. ख. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

क्षेत्र इति वास्तुमण्डलकथनम्। सर्वतो नवपुटं क्षेत्रमास्फाल्य तत्र मध्यतो नवपदैरेकं पदं मार्जनतस्सम्पाद्य तत्र स्वस्तिकमष्टदलकमलं वा लिखेत्। ततश्चतुर्दिक्षु द्विद्विपुटगतेन षट्केनैकैकं पदं सम्पाद्यम्। कोणेषु द्विद्विपदतो द्वे द्वे पदे स्याताम्। ततः परितो बाह्यपङ्क्तौ चतुर्दिक्षु पदानि द्वात्रिंशद् भवन्ति। पुनरष्टदिक्षु शर्वस्कन्दादीनामेकैकं पदमुपजनयितव्यमिति। प्रकल्प्येत्यनेनैव रजोभिश्चित्रीकरणमप्युक्तम्। पदानां महत्त्वे स्वस्तिकानि कार्याणि। अर्पितदर्भक इति। मुष्टिमात्रैर्दर्भैः प्रतिपदमास्तरणमुक्तम्। दर्भकशब्देन कूर्चोऽपि वा अभिप्रेयते। महितपीठ इति। दैव्येव पीठपूजा प्रासादपुरुषपीठोचितत्वात्। यद्वा महितपीठ इति महीं करोति महयति ततो निष्ठा महिते पीठे इति, तस्य पीठ एव पृथिव्यन्तं पीठं प्रपूज्य। तत्र वास्तुपुरुषं पूजयेदिति भावः। सादीति। प्राग्वास्तुं यजेदिति सम्बन्धः। यजेदित्यावाहनादिपूर्वकं पूजनमुक्तम्। सादिवांवास्तुना ङेनतिमता पुरुषेणेति वास्तुदशाक्षरोद्धारः। आदिः प्रणवः। ओं वां वास्तुपुरुषाय नमः इति मन्त्रः। वां वीं इत्यादीन्यङ्गानि। वामादिकाङ्गैरिति। सहेत्युपस्कारः।।६०।।

तत्सन्नमःप्रपुटितं निजनाम ङेन्तं
तारादिकं निजपदाङ्गकमर्कवर्णम्।
ब्राह्मं मनुं विदुरथ प्रणवप्रणाम-
पूर्वं स्वनाम रसवर्णकमक्षराङ्गम्।।६१।।

विमर्शिनी

ब्राह्मं मनुमुद्धरति - तत्सन्नम इति। तारादिकं प्रणवादिकं तत्सन्नमःप्रपुटितं तत्सन्नम इत्यनेन रुद्धम्। ङेन्तं चतुर्थ्येकवचनान्तम्। निजनाम ब्रह्मेति नाम 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः' इति। अर्कवर्णं द्वादशाक्षरं ब्राह्मं मनुं विदुः। निजपदाङ्गकम् अस्य मन्त्रस्य निजपदानि अङ्गानि 'ओं हृदयाय नमः' 'तत्सत् शिरसे स्वाहा' इत्यादि। अथेति पक्षान्तरद्योतकमव्ययम्। प्रणवप्रणामपूर्वम् 'ओं नमः' इत्यादिकम्। स्वनाम ब्रह्मेति नाम। चतुर्थ्यन्तमित्यर्थात् सिद्धं भवति। 'ओं नमो ब्रह्मणे' इति। रसवर्णकं षडक्षरम् अक्षराङ्गम् अस्याक्षरैरङ्गानीत्यर्थः।।६१।।

Shripuram Publications
www.shripuram.org

विवरणम्

वास्तुद्वादशाक्षरमाह - तत्सदिति। तत् ङेन्तं निजनाम इति। वास्तुपुरुषायेत्येवं स्थितस्य पूर्वोक्तस्य नाम्नो ग्रहणम्। तारादिकमिति पुटनक्रियाविशेषणम्। 'ओं नमो वास्तुपुरुषाय ओं नमः' इति मन्त्रः। निजपदाङ्गकमिति। षड्भिः पदैरङ्गान्युक्तानि। ब्राह्मं द्वादशाक्षरमप्यनेनैवोद्धृतम्। तत् सन्नमःप्रपुटितमित्येकं पदम्। निजनाम ब्रह्मपदम्। 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नम' इति। निजपदाङ्गकमिति। अत्र तत्सदित्येकमेव पदं द्रष्टव्यम्। रसवर्णं षड्क्षरम्। अक्षराङ्गमिति। अत्र पञ्चमवर्णेन नेत्रद्वयमस्त्रान्ते इष्यते।।६१।।

तत्र वास्तुतनुक्लृप्तविष्टरेऽथार्यकादिवृतमात्मसम्भवम्।
सन्निधाप्य मनुनामुनोदितेनाङ्गषट्कसहितं समर्चयेत्।।६२।।

विमर्शिनी

एवं मन्त्रा[1]दिकमुक्त्वा ब्रह्मादीनां पूजामाह - तत्रेति। अथ वास्तुपूजानन्तरम्। वास्तुतनुक्लृप्तविष्टरे वास्तुतन्वा क्लृप्ते विष्टरे। आर्यकादिवृतम् आर्यकादिभिः परिवृतम्। आत्मसम्भवं ब्रह्माणम्। उदितेन उक्तेन। अमुना मनुना। सन्निधाप्य आवाहनादि कृत्वा, अङ्गषट्कसहितं यथा भवति तथार्चयेत्।।६२।।

विवरणम्

तत्र वास्तुतनुक्लृप्तविष्टर इति। वास्तुपुरुषस्य शरीरेणैव कल्पिते पीठे। तदेव ब्रह्मादिदेवतानां पीठमिति भावः। यद्वा वास्तुपुरुषशरीरेऽपि क्लृप्ते पीठे इति। तदुपरि ब्रह्मणः स्वकं धर्माधर्मादिरूपं पीठं पूजयेत्। अणिमादिसर्वसिद्ध्यन्ता नव शक्तयः। 'सर्वज्ञानक्रियाव्यक्तकमलासनाय योगपीठात्मने नम इति समष्टिमन्त्रः। आर्यकादीनां पद्ममात्रं पूजनीयम्। आत्मसम्भवं स्वाङ्गषट्कसहितमार्यकादिवृतमिति सम्बन्धः। आत्मसम्भवो ब्रह्मा। स च स्रुक्स्रुवदण्डकमण्डलुधरो रक्तः प्रतिपत्तव्यः। सन्निधाप्येति मूर्त्तिकल्पनावाहनादिकमुक्तं स्वस्वमन्त्रेण। आर्यकादीनामाराधनमात्रेण सन्निधापनम्। उदितो मन्त्रो द्वादशाक्षरः षडक्षरो वा।।६२।।

---

१. 'न्त्रानुक्त्वा' ग. पाठः

Shripuram Publications
www.shripuram.org
www.shripuram.org

आर्यकसावित्राख्यौ सविता सविवस्वदिन्द्रजय इन्द्रः।
मित्रो रुद्रजयाभिधरुद्रमहीधरयुतापवत्सापाः।।६३।।

विमर्शिनी

प्रस्तुतमार्यकादिकं पठति - आर्यकसावित्राख्याविति। आर्यकसावित्राख्यौ आर्यकः सावित्रश्च आर्यकाय नमः, सावित्राय नमः, सविता सवित्रे नम इत्यादि। सविवस्वदिन्द्रजयः विवस्वदिन्द्रजयाभ्यां सहितः। इन्द्रः मित्रः। रुद्रजयाभिधरुद्रमहीधरयुतापवत्सापाः रुद्रजयो रुद्रो महीधर आपवत्स आपश्च।।६३।।

विवरणम्

आर्यकसावित्राख्याविति। सविता सावित्र इति केचित्। सविवस्वदिन्द्रजय इति। विवस्वानिन्द्रजयश्च। आपवत्स आपश्च देवताद्वयम्।।६३।।

प्रागादीशान्तममी क्रमशः स्युरथापपूर्वयजनविधौ।
कोणगतद्वितयानां स्वक्षेत्राणां क्रमो विपर्येयः।।६४।।

विमर्शिनी

अमी प्रागादीशान्तं क्रमशः स्युः। अथेति पक्षान्तरद्योतको निपातः। आपपूर्वयजनविधौ बहिरारब्धपूजायाम्। कोणगतद्वितयानाम् आपवत्सापादीनां स्वक्षेत्राणां स्थानैः सहितानां क्रमो विपर्येयः व्यत्यसनीयः। अत्र नमोन्ताश्च मन्त्रा ग्राह्याः।।६४।।

विवरणम्

प्रागादीति। हरिमहिषनिहन्त्र्योरिति वक्ष्यमाणत्वात् तद्विषयमेतत्। क्रमशः स्युरिति। अत एवाग्नेयवायव्यद्विकानां प्रागायतत्वं नैर्ऋतैशानद्विकानामुदगायतत्वं च लभ्यते। अथापपूर्वयजनविधाविति। शिवादिविषयमेतत्। ऐशद्विकयोः पूर्वस्मिन्नापः पश्चिम आपवत्सः पूर्वपद आर्यक इत्यादि।।६४।।

ईशानः पर्जन्यो जयन्त इन्द्रः ससूर्यसत्यभृशः।
भूयोऽन्तरिक्षवह्नी पूषा वितथो गृहक्षतोऽथ यमः।।६५।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

ईशानः पर्जन्यः जयन्तः इन्द्रः। ससूर्यसत्यभृशः सूर्यः सत्यो भृशश्च। भूयः पुनः। अन्तरिक्षवह्नी अन्तरिक्षो वह्निश्च, अग्नये नमः इति। पूषा वितथः गृहक्षतः अथ यमः यमश्च।।६५।।

विवरणम्

ईशान इति। अत्र ईशानाग्निपितृवाय्वादयोऽग्न्यादिकोणपदमारभ्य प्रतिदिशमष्टाष्ट स्यु। गृहक्षतो गृहरक्षको वा।।६५।।

गन्धर्वभृङ्गराजौ मृगपितृदौवारिकाः ससुग्रीवाः।
अथ पुष्पदन्तवरुणासुरशोषा रोगवायुनागाश्च।।६६।।

विमर्शिनी

गन्धर्वभृङ्गराजौ गन्धर्वो भृङ्गराजश्च मृगपितृदौवारिकाः मृगः पितरो दौवारिकश्च। ससुग्रीवाः सुग्रीवश्च। अथ पुष्पदन्तवरुणासुरशोषाः पुष्पदन्तो वरुणोऽसुरः शोषश्च। रोगवायुनागाः रोगो वायुर्नागश्च।।६६।।

विवरणम्

पितृशब्दो बहुवचनान्तः। रोगः पापयक्ष्मा। वा(युः)नाग(श्चे)ति।।६६।।

मुख्यो भल्लाटकसोमार्गलका दित्युदित्युपेताः स्युः।
ईशाद्यैकैकपदे द्वात्रिंशद्देवता बहिः प्रोक्ताः।।६७।।

विमर्शिनी

मुख्यः भल्लाटकसोमार्गलकाः भल्लाटकः सोमोऽर्गलश्च। दित्युदित्युपेताः दितिरुदितिरित्याभ्यां युक्ताः। बहिरीशाद्यैकैकपदे ईशकोणमारभ्य[1] प्रादक्षिण्यक्रमेणैकैकस्मिन् पदे। एता द्वात्रिंशद्देवताः प्रोक्ताः।।६७।।

विवरणम्

दित्युदित्युपेता इत्येकं पदम्। यद्वा भल्लाटकाद्येकं पदं दित्युदिती वान्त्ये देवते। अदितिदिती वा। एवमन्यदप्यवबोद्धव्यम्।।६७।।

---

१. 'रुद्रको' ख. पाठः

Shripuram Publications
www.shripuram.org

इति हरिमहिषनिहन्त्र्योरन्तर्बहिरर्चने क्रमोऽन्येषु।
ईशानादिबहिष्ठापादिधरान्तान्तरान्तरजनिष्ठः।।६८।।

विमर्शिनी

हरिमहिषनिहन्त्र्योरन्तर्बहिश्चार्चने इति क्रमः स्यात्। अन्येषु पञ्चसु। ईशानादि-बहिष्ठापादिधरान्तान्तरान्तरजनिष्ठः ईशानादिबहिष्ठ आपादिधरान्तान्तरोऽन्तरजनि-ष्ठश्च क्रमः स्यात्। ईशानादिद्वात्रिंशद्देवताभिर्बहिष्ठाभिर्युक्तः, आपापवत्सादिधरो महीधरः तदन्तो धरान्तस्ताभिर्द्वादशभिरन्तरे अन्तराले स्थिताभिर्देवताभिश्च युक्तः, अन्तरजनिष्ठः अन्तरस्थितब्रह्मावसितः क्रमः स्यात्।।६८।।

विवरणम्

हरिमहिषनिहन्त्र्योरिति। एवमुक्तप्रकारेणेत्यर्थः। पूर्वमीशानादिबहिष्ठास्तत आपादिमहीधरान्ता आभ्यन्तराः पुनरन्तर्ब्रह्मा। अनया व्यवस्थया युक्तः क्रम इति।।६८।।

शर्वस्कन्दार्यमणौ जम्भकपिलिपिञ्छकौ दिशि बहिः स्युः।
विदिशि चरकी विदारी पूतनिका पापराक्षसीशाद्यम्।।६९।।
अथ देवासुरगन्धर्वयक्षपितरः सनागराक्षसकाः।
पूर्वाद्यष्टदिशासु क्रमशः सपिशाचका ग्रहाः सकले।।७०।।

विमर्शिनी

अथ सकले बहिः द्वात्रिंशद्देवतानामपि बहिर्दिशि। शर्वस्कन्दार्यमणौ शर्वस्कन्द-श्चार्यमा च, जम्भकपिलिपिञ्छकौ जम्भकः पिलिपिञ्छकश्च स्युः। विदिशि ईशाद्यं यथा भवति तथा। चरकी विदारी। पूतनिका इति पूतना। पापराक्षसी च स्युः। पूर्वाद्यष्टदिशासु क्रमशो देवासुरगन्धर्वयक्षपितरः देवा असुरा गन्धर्वा यक्षाः पितरश्च। सनागराक्षसकाः नागा राक्षसाश्च। सपिशाचकाः पिशाचाश्च। ग्रहा इति देवग्रहेभ्यो नम इत्यादिमन्त्रा उक्ताः।।६९, ७०।।

विवरणम्

दिशीति। पूर्वादिदिक्षु ईशाद्यम्। विदिशीति। ऐशान्यादिविदिक्षु। पूतनिका पूतना।

Shripuram Publications
www.shripuram.org

ग्रहाः सकल इति। ग्रहग्रहणेन देवग्रहेभ्योऽसुरग्रहेभ्य इत्येवं प्रयोग उक्तः।।६९, ७०।।

विरिञ्चं द्विपञ्चाशता देवताभिर्वृतं चार्चयित्वा यथोक्तक्रमेण।
अमुष्मै निवेद्याथ तद्देवताभ्यस्त्रिपञ्चाशते तत्र दद्याद् बलिं च।।७१।।

विमर्शिनी

द्विपञ्चाशता देवताभिर्वृतं विरिञ्चं ब्रह्माणम् यथोक्तक्रमेणार्चयित्वा पूजयित्वा। अमुष्मै ब्रह्मणे निवेद्य। अथ त्रिपञ्चाशते तद्देवताभ्यस्तत्र बलिं च दद्यात्।।७१।।

विवरणम्

द्विपञ्चाशतेति देवग्रहाद्युपलक्षणम्। वाद्ययोगो बलिक्लृप्तिश्च सामान्यतो लभ्यते। *विद्वानिति ब्रह्मणो निवेद्यविकल्पः सूचितः। यद्वा वास्तुशरीराद्यभिज्ञत्वमुक्तम्। तदुक्तम्।

"ईशानेऽस्य शिरः क्षिप्तं पादौ निर्ऋतिगोचरौ।
जानुनी कोर्परे (?) चास्य वायव्याग्नेयकोष्ठयोः।।
करौ वक्षसि निक्षिप्य प्रोत्तानः शयितस्तथा।"

इति। नीचीनः शयित इत्येके।

"मूर्ध्नीशो दितिपर्जन्यौ दृशोरापश्च तन्मुखे।
आपवत्सो गलेंऽसस्थौ जयन्तश्चादितिस्तथा।
इन्द्रार्गलादयो बाह्वोः स्तनयोरार्यभूधरौ।
कुक्षौ मित्रविवस्वन्तौ मेढ्रेऽण्डे चेन्द्रतज्जयौ।।
सा(वि)त्रः सविता रुद्रस्तज्जयश्च प्रकोष्ठयोः।
पादयोः पूषपापाद्यास्तदग्रे पितरः स्थिताः।।
शिरोंऽसाद्युपान्तेषु चरकीशर्वस्कन्दादयः।
हृदये ब्रह्मा ... ...।।"

इति। यद्वा तद्देवतारूपाभिज्ञत्वं विद्वच्छब्देनाभिप्रेतं, यदुक्तम्-

"ब्रह्मा चतुर्मुखो रक्तो लम्बकूर्चश्चतुर्भुजः।
अक्षमालां स्रुवं दक्षे वामे दण्डं कमण्डलुम्।।" इति।।

---

* 'अमुष्मै निवेद्याथ विद्वान् प्रदद्याद् बलिं चाखिलाभ्योऽथ तद्देवताभ्यः' इति विवरणपाठः

www.shripuram.org

'सर्वे चतुर्भुजा ध्येया वास्तुदेहे व्यवस्थिताः।
हृदञ्जलिपुटास्सर्वे खड्गखेटकपाणयः।।
खड्गं च पानपात्रं च क्षुरिकां कर्तरीं तथा।
दधाना भीमरूपास्ता राक्षस्यः परिकीर्तिताः।।
वज्रं शक्तिं च खड्गं च पाशं च विकृताननाः।
दधाना भीषणाः प्रोक्ता ग्रहा स्कन्दादिकाश्च ते।।"

इति। यद्वा विद्वच्छब्देन प्रतिदैवतं बलिद्रव्याभिज्ञत्वमुक्तम्। दध्याज्यगुलमिश्रमन्नं ब्रह्मणः, पायसकृसरमाषान्नगुळान्नघृतान्नदध्यन्नैरेकैकवर्गस्य बलिरिति। अयं संक्षेपबलिः। अथ विस्तारबलिः।

आज्याक्षतैर्यजेदीशमुत्पलाभिः पताकया।
रत्नैर्वितानैः कौसुम्भैर्माषैर्मांसैः स्रुचानलम्।।
लाजैस्सुवर्णैर्भूयोऽपि लड्डुकैः पिशितैरपि।
गन्धैश्च खगजिह्वाभिर्यवैश्च तिलवारिभिः।।
दौवारिकं दन्तकाष्ठैर्धूपैर्दर्भैश्च पङ्कजैः।
सुरया च घृतान्नेन यवैश्च घृतमण्डकैः।।
नागं नागप्रसूनैश्च भक्ष्यैर्मुद्गौदनेन च।
मधुपायसैस्तण्डुलैश्च शाल्यन्नैर्माषसंयुतैः।।
क्षीरेणापमथैशान्यां पादार्धे वा पदद्वये।
तत्पूर्वे सर्पिषा प्राच्यां लड्डुकैश्च कुशोदनैः।।
अग्नौ तु दक्षिणे पुष्पगुलैररुणचन्दनैः।
हरिद्रान्नेन नैर्ऋत्यां चित्रान्नैस्तस्य पश्चिमे।।
घृतान्नेन गुळान्नेन वायव्यां तस्य चोत्तरे।
पक्वामयाभ्यां मांसाभ्यां माषमुद्गौदनैरुदक्।।
मांसैस्सहार्चयित्वा तु ब्रह्माणं मध्यतो यजेत्।
तिलगव्याक्षताज्यान्नैर्बाह्ये शर्वादिकान् यजेत्।।
पायसैः कृसररुधिरैर्वसारक्तप्रसूनकैः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

भक्ष्यमांसैर्मांसपित्तैर्दध्यन्नेन तु पूतनाम्।।
दुग्धपित्तास्थिमांसान्नैर्वायव्यां पापराक्षसीम्।

इति। अत्र सर्वत्राज्याक्षताद्युक्तद्रव्यप्रधानेनान्नेन बलिः। मांसरुधिरादीनां मोदकरक्तजलादयः प्रतिनिधयः स्युः। तत्पूर्वं सर्पिषेत्यापवत्सस्यापपाग्भागेऽवस्थानमुक्तम्। कोणगतद्वितयानां विपर्यासोऽत्राभिप्रेयते। कृसररुधिरैरिति द्रव्यद्वयमुक्तं शैवादिष्वेव। वैष्णवादिषु तु भेदः। सत्यकस्य गोधूमान्नं मृगस्य तिलयवान्नं वितृणां कृसरः सुग्रीवस्य धूपापूपान्नं पुष्पदन्तस्य कुशस्तम्बघृतान्नम्। अर्गलस्य अक्षतशालूकान्नम्, आपवत्सस्य हविर्दध्यन्नमिति।

"भक्ष्यान्नाज्यं चरक्यै तु विदार्यै पद्ममांसकम्।
रक्तान्नं दधिमांसं च क्षीरपित्तारुणोदनम्।।
पूतनापापयोर्दिक्षु दद्यान्मांसाज्यपायसम्।
पललापूपकृसरं मांसपित्तासृगान्त्रकम्।।
सरक्तकुसुमान्नं च ततो दिक्षु बलिं हरेत्।
पायसं रक्तमसितं हारिद्रं कृसरं सितम्।।
सभक्ष्यं सतुषोदं च ग्रहेभ्योऽन्नं क्रमाद् भवेत्।।"

इति।।७१।।

कुशप्रसूनाक्षतवारिहव्यैस्त्रिशः किरेद् वास्तुचतुर्मुखाभ्याम्।
सकृत् सकृत् तत्परितः परेभ्यो बहिर्ग्रहेभ्योऽञ्चितपञ्चकूरैः।।७२।।

विमर्शिनी

कुशप्रसूनाक्षतवारिहव्यैः कुशपुष्पाक्षतजलमिश्रैर्हविर्भिः। वास्तुचतुर्मुखाभ्यां वास्तुपुरुषाय ब्रह्मणे च। त्रिशः बलिं किरेत्। तत्परितः तस्य परितः। परेभ्य आर्यकादिभ्य ईशानादिभ्यो वा। सकृत् सकृत् एकशः। बहिः शर्वस्कन्दादीनां बहिः। ग्रहेभ्यः देवग्रहादिभ्यः। अञ्चितपञ्चकूरैः पञ्चकूरमिश्रैर्हविर्भिरित्यर्थः।।७२।।

विवरणम्

परेभ्य इति। कुशप्रसूनाक्षतवारिहव्यैरित्यनुषङ्गः। एवम् अञ्चितरञ्चकूरैरित्य-

www.shripuram.org
Shripuram Publications
www.shripuram.org

त्रापि। अञ्चनं पूजनं सकलनिवेद्यसंस्कारोपलक्षणमेतत्। ब्रह्मादिहविषामप्येतत् समानम्।।७२।।

कृत्वा बलिं सलिलमत्र सकृत् सकृच्च
दत्त्वा प्रसन्नयजनं प्रविधाय धातुः।
तद्वास्तुदैवतकदम्बकृतावलम्बं
प्राकारमध्यमवबुध्य करोतु रक्षाम्।।७३।।

विमर्शिनी

बलिं कृत्वा अत्र देवतासु। सकृत् सकृत् सलिलं च दत्त्वा। धातुर्ब्रह्मणः प्रसन्नयजनं प्रविधाय। प्राकारमध्यं महामर्यादान्तर्भागम्। तद्वास्तुदैवतकदम्बकृतावलम्बं पूर्वोक्त-वास्तुदेवतानां समूहेन प्राप्ताश्रयम्। अवबुध्य ध्यात्वा रक्षां करोतु।।७३।।

विवरणम्

धातुः प्रसन्नयजनं प्रविधायेति धाता ब्रह्मा। इतरेषामप्यविशेषादेतत् सामान्येन कर्तव्यम्। तद्वास्तुदैवतकदम्बकृतावलम्बमिति। कदम्बः समूहः। प्राकारमध्यं प्राकार-चतुष्टयाभ्यन्तरस्थलम्। अयमभिप्रायः - नैषामुद्वासनमस्ति, किंतु वास्तुपुरुषस्य प्राकारपर्यन्ततया प्राग्व्याख्यातवदवस्थानं तदुपरि यथोक्तपदक्लृप्त्या ब्रह्मादीनामवस्थानं च वर्गशो व्यापकपुष्पाराधनभावनाभिः कल्पनीयमिति। यद्वा *कृतिः पूजा अलंबो विनिपाताभावः। वास्तुदेवतानामित्थं पूजायां विनिपाताभावः प्राकाराभ्यन्तरस्य विभाव्य इति। अयं भावः। वास्तुदेवतानां प्रसन्नपूजान्ते विघ्नादिभिर्विनिपाताभावादि प्रार्थनीयमिति। तदुक्तम्। 'विहितो वास्तुबलिः स्याद् रक्षोविघ्नोपशान्तिसम्पद्भ्य' इति। कृत्स्नप्रासादा-दिनिर्माणाङ्गमेष वास्तुयाग इति ज्ञेयम्।।७३।।

गर्ते तत्र विशोधिते विनिहिताधाराश्ममध्यावटे
धान्याद्याहितविष्टरेऽथ निधिकुम्भं ताम्रजं वाश्मजम्।
मूलेन प्रणिधाय तत्र विधिवद् रत्नादिपूर्णेऽर्णजं
सम्पूज्याब्जमिहाभिराध्य भुवनेशीमर्थयेतामुना।।७४।।

* 'तद्वास्तुदैवतकदम्बकृतेरलम्बम्' इति पाठमङ्गीकृत्येदं व्याख्यानं प्रतिभाति।

www.shripuram.org

विमर्शिनी

निधिकलशादिस्थापनमाह - गर्त इति। अथ विशोधिते विशेषेण शोधिते तत्र गर्ते। विनिहिताधाराश्ममध्यावटे स्थापिताया आधारशिलाया मध्यस्थे गर्ते। धान्याद्याहितविष्टरे धान्यतण्डुलादिभिः क्लृप्ते पीठे। ताम्रजं ताम्रमयम्। अश्मजं वा शिलानिर्मितं वा निधिकुम्भं निधिकलशम्। मूलेन प्रणिधाय न्यस्य। तत्र पीठे। विधिवत् कलशन्यायेन। रत्नादिपूर्णे रत्नकनकादिभिः पूर्णे निधिकलशे। अर्णजमब्जं ब्रह्मकलशपूजायां वक्ष्यमाणं लिपिपङ्कजं सम्पूज्य। इह लिपिपद्मे भुवनेशी शक्तिम्। अभिराध्यावाह्य सम्पूज्य। अमुना वक्ष्यमाणेन मन्त्रेण। अर्थयेत प्रार्थयेत्।।७४।।

विवरणम्

इदानीं प्रासादशरीरमूलावयवभूताधारशिलादिनिष्पादनरूपां पातालप्रतिष्ठां प्रस्तौति - गर्ते तत्रेति। विशोधित इति। मुष्ट्यादिभिः स्थलशुद्धिरुक्ता। स्नानसकलीकरणादि सर्वं दिनान्तरे चेद् अर्थसिद्धम्। विनिहिताधाराश्ममध्यावट इति। आधारशिलादिलक्षणं कर्मशेषे भविष्यति। तत्र गर्ते प्रथमं तावद् भाविनपुंसकशिलासमसूत्रलक्षणे स्थाने सुदृढीकृते प्रासादमूलावयवभूतामाधारशिलां विनिदध्यात्। शिल्पिना प्राग्विनिहितामपि विनिधानधिया स्पृशेत्। तस्यास्तथा विनिहिताया यो मध्यदेशे निधिकलशनिश्चलतार्थं प्रागेव कृतोऽवटस्तस्मिन्नित्यर्थः। यद्वा विनिहित आधारो यस्मिन्नित्यपि समसनीयम्। विनिधानं विशेषतस्सन्निधापनम्। कृत्स्नस्य निधिकलशपृथिवीनपुंसकशिलाद्यभिमानिशक्तिमण्डलस्य नानाविशेषलक्षणस्य यत् सामान्यं तद्विशेषाणां स्वसामान्याश्रयत्वाद् आधारोऽभिप्रेयते। अयमिहाशयः। यद्दिगभिमुखतया भाविनी प्रतिमाभिमता तद्दिगभिमुखतयैवाधारशिलानिधिकलशादि सर्वं प्रतिष्ठापनीयम्। तथा चोक्तम्।

"द्वारदिग्वीक्षमाणं तु मध्ये मन्त्रघटं न्यसेद्"।

इति। निधिकलशाभिप्रायमेतत्। ततश्च स्थलशुद्धौ कृतायामेतदुचिते पूजास्थान उपविश्य आत्मनः सकलीकरणादि सर्वं विधाय गणपतिपूजाद्यनन्तरं तामाधारशिलां गव्यादिभिरस्त्रेण संशोध्य शोषणादि कृत्वा प्रणवेन शक्त्या वा सम्पूज्य तेनैव प्रतिष्ठाप्य "ध्रुवा द्यौ"रित्यभिमृश्य येन पूजिता तेनैव भाविकृत्स्नशक्तिमण्डलसामान्यलक्षणं परं महोऽभिवाह्य संपूज्य सन्निधापयेदिति। यदुक्तम्।

www.shripuram.org
Shripuram Publications
www.shripuram.org

'या शिला कलशाधारसंज्ञा तां विद्धि सर्वगाम्।
सामर्थ्यशक्तिं सामान्यां निष्कलां परमेश्वरीम्।।' इति।
'संस्मरन् मन्त्रचक्रं तु सानन्तं प्रणवेन वै।
बीजभूतं तदन्तस्थमध्वषट्कं स्मरन् यजेत्।।'

इति च। धान्याद्याहितविष्टर इति वस्त्रादिग्रहणम्। तदवटे स्वस्तिकमष्टदलकमलं वालिख्य व्रीह्यादिभिर्यथान्यायं पीठं विरचय्य तत्र पीठपूजां विदध्यात्। ताम्रजमश्मजं वेत्यन्वयः। मूलेन प्रणिधायेति। तत्र कुम्भसंस्कारपूर्वकं यथा न पुनश्चलनं स्यात् तथा मूलमुच्चरन् विन्यस्येत्यर्थः। मूलग्रहणं ध्रुवा द्यौरित्यादिजपोपलक्षणम्। विधिवदिति सकलकलशन्यायप्राप्त्यर्थमुक्तम्। रत्नादिपूर्ण इति सुवर्णधान्यादिग्रहणम्। हिरण्मय्याधार-शक्तिरपि तस्मिन् विधीयते। अर्णजमब्जं लिपिपङ्कजम्। तच्च स्नपनपटले वक्ष्यते। इह भुवनेशीमभिराध्य हरिहरादिषु सर्वेष्वपि ह्रींबीजेन मूर्तिकल्पनावाहनादिपूर्वकमाराध्ये-त्यर्थः। आधारशक्तिरियमिति सम्प्रदायः। त्वमेवासनधारिकेति च तत्र लिङ्गम्। अङ्गलोकपालादिभिः पूजा स्यात्। अर्थयेतामुनेति। त्वमेव परमा शक्तिरित्यमुनेत्यर्थः। प्रागवसानीयार्घ्यदानादियमर्थना।।७४।।

**त्वमेव परमा शक्तिस्त्वमेवासनधारिका।
सन्तृप्तया त्वया देवि! स्थातव्यमिह सर्वदा।।७५।। इति।**

विमर्शिनी

मन्त्रमाह - त्वमेवेत्यादि।।७५।।

**तद्दक्षिणे दर्भमृदादिशोधितं
निधाय कूर्मं कृतधान्यविष्टरे।
विशोध्य तं धारणयात्ममन्त्रतः
प्राच्यार्धिवास्येति घटोपरि न्यसेत्।।७६।।**

विमर्शिनी

तद्दक्षिणे कृतधान्यविष्टरे धान्यादिभिर्विरचितपीठे, अर्थात् पूजितपीठे। दर्भमृदादिशोधितं दर्भमृत्त्वग्भिः संघृष्य क्षालितम्। कूर्मं शिलापद्मं शिलाकूर्मं रजतपद्मं

Shripuram Publications
www.shripuram.org

रजतकूर्मं स्वर्णपद्मं स्वर्णकूर्मं च निधाय। धारणया शोषणादिभिः, तानि विशोध्य। आत्ममन्त्रतः कूर्मस्य[१] मन्त्रेण प्राच्र्य सम्पूज्य। वस्त्रेणाच्छाद्याधिवास्य। इति वक्ष्यमाण-प्रकारेण। घटोपरि निधिकलशस्योपरि न्यसेत्।।७६।।

विवरणम्

दर्भमृदादिशोधितमिति। पूर्वं दर्भमृत्त्वग्भिर्घृष्ट्वा क्षालितं पुनर्घृतेनाङ्क्त्वा मसूरमुद्गादिपिष्टेनोद्वर्तनपूर्वकमपि क्षालितमित्यर्थः। कूर्ममित्येकवचनमेककूर्माभिप्रायम्। स चाश्मजो राजतो हैमो वा। यद्वा द्वयोस्त्रयाणां वा सामान्यतो निर्देशः। पद्ममपि तद्वद् द्रष्टव्यम्। कृतधान्यविष्टर इति। स्वस्तिके पीठं विरचय्य तत्रेत्यर्थः। धारणयेति। भूतसंहारशोषणादि, भूतसर्गाद्यभिधानं जीवाहरणादि सर्वं न्यायसिद्धम्। आत्ममन्त्रतः प्राच्र्येति। प्रणवो वक्ष्यमाणनिजमन्त्रो वा आत्ममन्त्रोऽभिप्रेतः। तेन मन्त्रोदयादिसर्वपूर्वक-मावाहनादि कृत्वाङ्गलोकपालादिभिः सह पूजां कुर्यात्। अधिवास्येति। वस्त्रेणाच्छादनादिकं तथा भावनाविशेषश्चोक्तः। इतिशब्दो वक्ष्यमाणप्रकारार्थः। शिलादिपद्मानामपि यथास्वं दर्भमृदादिशोधनं शोषणादिकं प्रणवेन शक्त्या वा पूजनमपि कार्यम्।।७६।।

शिलापद्मं कुम्भोपरि सुविनिधायार्णकमलं
समर्च्यास्मिन् भाव्यालयवदुपधायाश्मकमठम्।
अकूबारायेति प्रणवनमसोरन्तरभुवा-
णुनावाह्यानेन प्रणवविहिताङ्गं यजतु च।।७७।।

विमर्शिनी

केन प्रकारेणेत्यत्राह - शिलापद्ममिति। कुम्भोपरि निधिकलशोपरि। शिलापद्मं शिलामयं (पद्मं) सुविनिधाय सुस्थितं यथा भवति तथा विनिधाय। अर्णकमलं लिपिपङ्कजं समर्च्य। अस्मिन् पद्मे। अश्मकमठं शिलाकूर्मम्। भाव्यालयवद्, भविष्यत्प्रासादं यन्मुखं तद्वदित्यर्थः। प्रणवनमसोः अन्तरभुवा मध्यस्थेन अकूबारायेत्यणुना। उपधाय सुस्थितं स्थापयित्वा। अनेन मन्त्रेणावाह्य। प्रणवविहिताङ्गं प्रणवेन कृताङ्गं तं यजतु च।।७७।।

विवरणम्

शिलापद्मं कुम्भोपरि सुविनिधायेति। निधिकलशमुखे पल्लवालङ्कृते यथा

१. 'स्य मणेर्मन्त्रे' क. पाठः

Shripuram Publications
www.shripuram.org

पुनश्चलनं न स्यात् तथा निधायेत्यर्थः। अर्णकमलं समर्च्येति तस्मिन् पद्मे लिपिपङ्कजपूजोक्ता। यद्वा, अर्णेषु कमला श्रीर्यत्रेत्यपि समसनीयम्। लिपिपङ्कजाकारेऽक्षरजाते मूलप्रकृतिलक्षणा श्रीरप्यावाह्य पूजनीयेति तदाशयः। कमलागृहं वैष्णवप्रस्थानापेक्षमेव। शैवप्रस्थाने तु हृल्लेखोपलक्षणमेतत्। 'त्वमेव परमा शक्तिस्त्वमेव प्रकृतिः परा। सन्तृप्तया त्वया देवि स्थातव्यमिह सर्वदे'त्येवमर्थनापि स्यादिति। भाव्यालयवद् भावी प्रासादो यद्दिङ्मुखः तद्दिङ्मुखमित्यर्थः। अश्मकमठः शिलाकूर्मः। प्रणवनमसोरन्तरभुवा अकूबारायेत्यणुनेत्यन्वयः। वर्णैरष्टाङ्गदेहं कल्पनीयम्।।७७।।

तदूर्ध्वस्थे पद्मे रजतरचिते सार्णकमले
न्यसेद् रौप्यं कूर्मं प्रयजतु च तेनैव मनुना।
तथा स्वर्णाम्भोजेऽर्चितलिपिसरोजे कनकजं
निधायेष्ट्वा कूर्मं विधिवदमुना प्रार्थयतु च।।७८।।

नमस्ते कूर्मरूपाय विष्णवे विश्वधारिणे।
करिष्यमाणं प्रासादमिह त्वं धर्तुमर्हसि।।७९।।

तदूर्ध्वस्थे शिलाकूर्मोपरिस्थिते रजतरचिते पद्मे। सार्णकमले पूजितलिपिपङ्कजे। रौप्यं रूप्यमयं कूर्मं तेनैव मनुना न्यसेत् प्रयजतु च। तथा तद्वदेव स्वर्णाम्भोजे सौवर्णं पद्मं निधाय। तत्र अर्चितलिपिसरोजे पूजितलिपिपङ्कजे। कनकजं कनकमयं कूर्मम्। विधिवत् पूर्वविधिना निधाय। इष्ट्वा सम्पूज्य। अमुना वक्ष्यमाणमन्त्रेण। प्रार्थयतु प्रार्थनं कुर्यात्।।७८।।

प्रार्थनामन्त्रमाह - नमस्त इत्यादिना।।७९।।

विवरणम्

तदूर्ध्वस्थ इति कूर्मोपरिजराजतपद्मनिधानमुक्तम्। सार्णकमल इति तस्मिन् लिलिपङ्कजपूजोक्ता। तथा स्वर्णाम्भोज इति। राजतकूर्मोपरि निहित इति भावः। विधिवदिति सर्वत्र स्वमन्त्रेण प्रतिष्ठापनं ध्रुवादिजपश्चोक्तः। पद्मानामपि मूलप्रकृतिपक्षे समानमेतत्। पद्मानामेव त्रित्वे तु हेमपद्मे मूलप्रकृतियागानन्तरमेव कूर्मवदुपस्थानमिति ज्ञेयम्। निवेद्यं प्रसन्नपूजां च कृत्वा अवसानीयार्घ्यदानात् पूर्वमुपस्थानं भवति।

Shripuram Publications
www.shripuram.org

कर्मावसानेऽस्त्रेण तालत्रयादिकरणं सर्वत्र समानम्।।७८, ७९।।

विघ्नेशापचितिं विधाय यमदिग्द्वार्यग्रतः स्वस्तिके
देवं[1] च प्रसमर्च्य शेषहविषा हुत्वा प्रसाद्याथ तम्।
कूर्मस्योपरियोगनालमुपधायाजन्मभूम्युद्गतं
गर्तं मृत्तिकयाभिपूर्य दृषदा चाकोट्य दार्ढ्यं नयेत्।।८०।।

विमर्शिनी

अथ यमदिग्द्वारि भविष्यद्दक्षिणद्वारे स्थाने। विघ्नेशापचितिं गणपतिदक्षिणामूर्त्तिपूजां विधाय। अग्रतः कूर्मस्याग्रतः स्वस्तिके देवं च प्रसमर्च्य निवेद्य। शेषहविषा हुत्वा पूजाङ्गहोमं[2] कृत्वा। तं देवं प्रसाद्य कूर्मस्योपरि। आजन्मभूम्युद्गतम् अजन्मा ब्रह्मा तस्य भूमिः स्थानं, नपुंसकशिलेत्यर्थः, तत्पर्यन्तमुद्गतमूर्ध्वगतं योगनालम्। उपधाय स्थापयित्वा। आजन्मभूम्युद्गतं जन्मभूमिरुपानट्पर्यन्ता भूमिः, तदन्तमिति केचित्। गर्तं मुत्तिकया दृषदा च शिलयाभिपूर्य। आकोट्यायः कूटेन संताड्य। दार्ढ्यं स्थिरताम्। नयेत् प्रापयेत्।।८०।।

विवरणम्

यमदिग्द्वारि विघ्नेशापचितिं विधायेति। अपचितिः पूजा। भाविप्रासाददक्षिणद्वारोद्देशे स्वस्तिकमष्टदलं वालिख्य तत्र पूजापटलभाविरीत्या गणपतिपूजां विदध्यात्। कृत्स्नस्य प्रासादादिविधेस्साक्षितया सकलविघ्नपरिहारार्थमसौ गणपतिस्तत्र स्वायतने सन्निधाप्यत इत्यवबोद्धव्यम्। अग्रतः स्वस्तिके देवं प्रसमर्च्येति भाविप्रासादाग्रियद्वारोद्देशे स्वस्तिकेऽष्टदले वा तत्तद्देवस्य पूजापटलभाविरीत्यैवाराधनमुक्तम्। कृत्स्नस्य स्वकीयप्रासादादिविधेः साक्षितया सकलप्रवृत्त्यनुग्रहार्थमस्य सन्निधापनमेतदित्यवबोद्धव्यम्। शेषहविषेति निवेद्यावशेषहविषः पूजाङ्गतया होमोऽयमुक्तः। कूर्मस्योपरीति योगनाळलक्षणमपि कर्मशेषे वक्ष्यते। उपधानं विनिधानम्। आजन्मभूम्युद्गतमिति तदीयायामपरिमाणमुक्तम्। यद्वाजन्मभूमिः प्रासादाधिष्ठानं सैव च पृथिवी तद्धारितयास्यावस्थापनमनेनोक्तम्। तेनास्यानन्तरूपत्वमपि सूचितं भवति। तथा चास्त्रप्रोक्षणशोषणादिपूर्वकमनन्तमन्त्रेणार्चनाद्यपि कार्यम्। 'नमस्तेऽनन्तरूपाय विष्णवे विश्वधारिण' इत्येवमादिना प्रार्थनेति। गर्तं

१. 'देवेशं च स' क. पाठः, २. 'पूजां गणहो' ख. पाठः

Shripuram Publications
www.shripuram.org

मृत्तिकया दृषदा च अभिपूर्येति सारमृत्साभिर्वृत्तपाषाणैश्च यथोचितमभिपूरणमुक्तम्। निधिकलशे प्रतिष्ठापिते तदवधिपूरणम्। पद्मकूर्मे तु तदवधिपूरणं योगनाले निहिते च। कृत्स्नाभिपूरणमस्त्रप्रोक्षितमृद्दृषद्भिरौचित्यात् कार्यमिति च ज्ञेयम्। आकोटनमुपरिदेशे सम्यगृजूकरणम्। दार्ढ्यं नयेदिति। यथा चिरकालात्ययेऽपि पादुकादेरवनतिर्न स्यात् तथा याज्ञिकैर्हस्तिपादैस्तत्स्थलस्य दृढतापादनम्। जलादिपूरणमप्यर्थात् सूचितम्। यदाह - 'पूरयेद्वालुकाभिश्च जलैश्चोपरि पूजयेदि'ति।।८०।।

पूर्णप्रासाददेशे त्रिणयनपदसंप्रीणिताभीष्टवास्तौ
भाव्येतद्द्वारशाखापदमपि परिकल्प्योत्तरेणाथ चैतत्।
उल्लेखादिक्रमेण ज्वलनमुपसमाधाय गव्यादिसिक्ता-
स्तद्याम्येऽष्टेष्टकास्तद्यमदिशि कलशं च न्यसेत् क्लृप्तपीठे।।

विमर्शिनी

अथ पूर्णप्रासाददेशे पूर्णप्रासादस्थाने सत्यपरस्मिन् मुहूर्ते रात्रौ। त्रिनयनपदसंप्रीणिताभीष्टवास्तौ ईशभागकृतस्वस्ववास्तुबलौ च सति। भाव्येतद्द्वारशाखापदं भविष्यत्प्रासादद्वारस्य दक्षिणशाखायाः स्थानमपि परिकल्प्य। एतदुत्तरेण तस्योत्तरभागे। उल्लेखादिक्रमेण उल्लेखनमारभ्य क्रमेण। ज्वलनमग्निम्। उपसमाधाय स्थापयित्वा। परिधिस्थापनात् प्राक् तद्याम्ये तद्दक्षिणभागे। क्लृप्तपीठे विरचिते पीठे। गव्यादिसिक्ताः पञ्चगव्याष्टगन्धजलैः सिक्ता अष्टेष्टकाः। तद्यमदिशि तासां दक्षिणे कलशं च न्यसेत्।।८१।।

विवरणम्

तावता स्थलस्य दृढताभाव उपपीठबन्धनमपि कर्तव्यमिति पातालप्रतिष्ठामुक्त्वां प्रासादमध्यमावयवप्रक्रमरूपं प्रथमेष्टकोपधानं प्रस्तौति - पूर्णप्रासाददेश इति। गर्तं मृत्तिकया प्रपूर्य दृषदेत्येवं पूर्णे सति प्रासादोचितोद्देशे यदोपपीठयोगस्तदा पूर्णे तदुपरितने प्रासादोचितोद्देश इत्यर्थः। त्रिनयनपदसम्प्रीणिताभीष्टवास्ताविति। त्रिनयनपदं तत्र ईशानप्रदेशः। अभीष्टशब्देन स्वस्वोचितग्रहणम्। तत्र रात्रौ वास्तुपूजां प्रागुक्तवत् कृत्वेत्यर्थः। स्नानादि सर्वमर्थसिद्धम्। भाव्येतद्द्वारशाखामपि परिकल्प्येति। एतच्छब्देन प्रक्रान्तप्रासादग्रहणम्। द्वारशाखाकवाटयोगः भाविन्याः प्रासादप्रधानद्वारशाखायाः स्थानमपीष्टकाधानोप-

Shripuram Publications
www.shripuram.org

योगितया शिल्पिभिः सहावधार्येत्यर्थः। प्रासादपरिग्रहाच्च गर्भगृहद्वारशाखाया मुखमण्डपोपपत्तौ तदीयद्वारशाखायाश्च न ग्रहणोपपत्तिः। प्रासादद्वारस्य वामेतरस्मिन्नित्यादि वक्ष्यति। ततश्च दक्षिणेयं द्वारशाखावसीयते। अथैतदुत्तरेणेति। एतत्पदसन्निधावुदग्भागे इत्यर्थः। 'एनपा द्वितीये'ति एतच्छब्दस्य द्वितीया। तत्र मण्डपं परिवृत्तं स्थलं वा प्रागेव कृत्वा तत्रेष्टकागर्भहोमौ स्याताम्। ज्वलनमुपसमाधायेति। परिधानादर्वाचीनं सर्वमपि निर्वर्त्येति भावः। तद्याम्ये क्लृप्तपीठे गव्यादिसिक्ता अष्टेष्टकाः, तद्यमदिशि क्लृप्तपीठे कलशं च न्यसेदिति योज्यम्। स्वस्तिकेऽष्टदलपद्मे वा व्रीहिवस्त्रादिभिः पीठं कल्पनीयम्। पञ्चगव्येन मृज्जलगोमूत्रपञ्चगव्यैर्हेमरत्नोदकयुतैस्तैर्वेष्टकाः स्वास्त्रेण शोधनीयाः। स्वे पीठे यथादिशं प्रागग्रतया च न्यासः। गन्धविलेपनं सन्धूपनमपि कार्यम्। न्यग्बिलतया च कलशन्यासः।।८१।।

धारणाक्रमविशोधितास्ततः स्वाणुतः समभिपूज्य चेष्टकाः।
प्रार्च्य रत्नजलपूरितं घटं प्रारभेत हवनं[१] विधानतः[२]।।८२।।

विमर्शिनी

ततो धारणाक्रमविशोधिताः शोषणादिभिः शोधिताः इष्टकाः। स्वाणुतः स्वस्थापनमन्त्रतः समभिपूज्य। रत्नजलपूरितं रत्नैर्जलैश्च पूरितम्। घटं कलशं प्रार्च्य। हवनं होमम्। विधानतः परिधिस्थापनादिक्रमेण प्रारभेत।।८२।।

विवरणम्

ततो धारणाक्रमविशोधिता इति। पीठपूजानन्तरं शोषणदहनप्लावनकाठिन्यकरणैः क्रमतो विशोधिता इत्यर्थः। स्वाणुतः समभिपूज्य च इति स्वमूलमन्त्रेणावाह्य साङ्गाराधनमुक्तम्। यद्वा 'ईशेऽष्टाभिरि'ति वक्ष्यमाणमन्त्रैः पूजनं प्रतीष्टकं मूलमध्याग्रेषु भागेषु त्रितत्त्वपूजापि परतत्त्वादिक्रमेण मन्त्रविदा कार्या। प्रार्च्येति मूलेनावाहनादिपूर्वकं पूजनमुक्तम्। प्रारभेत हवनमिति ततः परिधिनिधानादिकमुक्तम्। विधानविदिति होमविधानम्। वक्ष्यति च - 'प्रारब्धाग्निमुखा स्वगृह्यविहितेने'त्यादि। यद्वा, द्वास्थानोदग्भागे मण्डपस्य संस्करणम्। तद्वेद्यामिष्टकाद्यधिवासस्तदुदगळिन्द एव वा। नागपदे स्वकुण्डे हवनमित्येतदपि सर्वं विधानविदित्युक्तम्।।८२।।

---

१. 'नं च मन्त्रवित्।।' क. पाठः, २. 'नवित्।।' ख. पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

पक्वात् प्राग् भर्गदुर्गास्मरमुरभिदि मूलाक्षरैर्विघ्नराजे
पक्वान्ते द्वादशाख्याभिरिह हरिहरे पञ्चतत्त्वैस्त्रिधाम्नि।
मूलार्णैस्त्र्यम्बके ब्रह्मभिरपि घृतमाहुत्य भूरादिमन्त्रै-
राज्यं द्रव्याहुतेः प्राङ् मुरभिदि जुहुयादूर्ध्वतश्चेतरेषु।।८३।।

विमर्शिनी

भर्गदुर्गास्मरमुरभिदि शिवदुर्गाशङ्करनारायणेषु। पक्वात् पक्वहोमात्। प्राक् पूर्वम्। मूलाक्षरैः मूलमन्त्रस्याक्षरैः 'ओं स्वाहा' 'नं स्वाहा' इत्यादिभिः। विघ्नराजे गणपतौ। पक्वान्ते द्वादशाख्याभिः 'ओं वज्रदन्ताय स्वाहा' इत्याद्यैर्द्वादशनामभिः। हरिहरे शङ्करनारायणे। इह पक्वान्ते पञ्चतत्त्वैः। त्रिधाम्नि विष्णौ। इह मूलार्णैः मूलमन्त्रस्याक्षरैः। त्र्यम्बके शिवे। इह ब्रह्मभिः पञ्चब्रह्ममन्त्रैः घृतहोमः स्यात्। अथ मुरभिदि विष्णौ। द्रव्याहुतेः प्राक् पुरः। भूरादिमन्त्रैः वक्ष्यमाणैराज्यं जुहुयात्। इतरेषु तदन्येषु। ऊर्ध्वतः द्रव्यहोमादूर्ध्वतश्च जुहुयात्।।८३।।

विवरणम्

तत्र होमे विशेषं दर्शयति - पक्वात् प्रागिति। इह भर्गदुर्गास्मरमुरभिदि पक्वात् प्राङ् मूलाक्षरैर्घृतहोम इति सम्बन्धनीयम्। कर्तव्य इति शेषः। मूलाक्षराणि च सबिन्दुकानि प्रणवपुटितानि स्युः। 'प्रारभेत हवनं च मन्त्रविदित्ये'वं निर्देशेन वैतल्लभ्यते। शिवे पीठमन्त्रैर्मूलाक्षरैश्चाज्यं हुत्वा तत्पुरुषेण पक्वं हुत्वा पुनः सद्यादिब्रह्मभिः प्रणवस्थाणुमन्त्रादिभिः पूजामन्त्रैश्च आज्यं हुत्वा व्योमव्यापिदशार्णेन पूर्णां जुहुयादिति क्रमः। एवं दुर्गादिष्वपि प्रयोगो विवेचनीयः। द्रव्याहुतेः प्रागिति। 'गायत्र्या सकलेष्वि'ति वक्ष्यमाणस्य द्रव्यहोमस्य ग्रहणम्। ऊर्ध्वतश्चेतरेष्विति। शिवादिषु चतुर्द्रव्यहोमं कृत्वा भूरादिमन्त्रैराज्यहोम इत्यर्थः।।८३।।

भूराद्याः पृथगेव लोकपतयश्चाग्निश्च सोमो ग्रहा
नक्षत्राणि ससंप्रदान*ठयुगा भूतानि नागा हरौ।

---

* 'ठद्वयं स्वाहा। द्विठमेव चेत्यस्य व्याख्याय द्विठं विसर्गस्तस्य बिन्दुद्वयात्मकत्वात्। विसर्गशब्देन च लक्षितलक्षणया स्वाहाकारो लक्ष्यते। स्वाहाशब्देनैव वह्नौ त्यागात् त्यागस्य च विसर्गपर्यायत्वाद् इत्येवं रघुनन्दनादिसम्प्रदायविदः।।' इति बृहदभिधानम्।

www.shripuram.org
Shripuram Publications
www.shripuram.org

सर्वाश्चाप्यथ देवतास्तदनु विश्वे चापि देवाः पुन-
र्विष्णुर्व्याहृतयश्च विष्णुपदमूलास्तेऽणवोऽन्येष्वतः।।८४।।

गायत्र्या सकलेषु प्रजुहोतु समिद्घृतान्नसर्पींषि।
पूर्णान्तं साष्टशतं दुर्गायां तानि मूलमन्त्रेण।।८५।।

विमर्शिनी

भूरादिमन्त्रानाह - भूराद्या इति। हरौ भूराद्याश्चत्वारोऽणवः। अथ लोकपतयः इन्द्राद्याः। पृथगेव 'इन्द्राय स्वाहा' 'अग्नये स्वाहा' इत्याद्याः। अग्निः सोमः ग्रहा नक्षत्राणि भूतानि नागाः सर्वाश्चापि देवताः तदनु विश्वे चापि देवाः पुनर्विष्णुश्च। एते ससंप्रदानठयुगाः[१] संप्रदानेन चतुर्थ्या ठयुगेन स्वाहाकारेण च युक्ताः पुनर्व्याहृतयश्च। अत्र 'सर्वाभ्यो देवताभ्य' इत्येक एव मन्त्रः। 'विश्वेभ्यो देवेभ्य' इति च। अतोऽन्येषु देवेषु। विष्णुपदमूलाः विष्णुस्थाने मूलमन्त्राः। तेऽणवो मन्त्राः।।८४।।

पुनर्होमशेषमाह - गायत्र्येति। सकलेषु समिद्घृतान्नसर्पींषि चत्वारि द्रव्याणि। गायत्र्या[२] स्वस्वगायत्र्या। साष्टशतम्[३] अष्टसहितशतं पूर्णान्तं प्रजुहोतु। दुर्गायां मूलमन्त्रेण तानि द्रव्याणि प्रजुहोतु।।८५।।

विवरणम्

भूराद्या इति। चतस्रो व्याहृतयः पृथगेव। लोकपतय इति। इन्द्रादिदशदिक्पालाः। अत एव नक्षत्राणां (न?) पृथक् परिग्रहो भवति। ससम्प्रदानठयुगा इति सर्वत्र सम्बध्यते। सम्प्रदानं चतुर्थी, ठयुगं स्वाहाकारः। सर्वा देवता इति सम्बन्धनीयम्। एवं विश्वे देवा इति। अतोऽन्येषु तेऽणवो विष्णुपदमूला इत्यन्वयः। शर्वादिष्वपि ते एव मन्त्राः, किन्तु विष्णुपदमन्त्रस्थाने स्वं स्वमूलं योज्यमिति भावः।।८४, ८५।।

पक्वान्ते नामद्विषट्केन दिक्पैर्भूतैश्चाज्यं बाहुलेये महद्भिः।
चन्द्रार्काभ्यां कालवह्निग्रहैर्दिङ्नक्षत्रैर्द्रव्यं हुनेन्मूलतोऽन्ते।।८६।।

विमर्शिनी

बाहुलेये स्कन्दे पक्वान्ते। नामद्विषट्केन नाम्नां द्वादशकेन। दिक्पैरिन्द्राद्यैः।

---

१. 'गाः प्रसिद्धवत् सं' ख. पाठः, २. 'त्र्या सा' क. ख. पाठः, ३. 'तं पू' ग. पाठः

Shripuram Publications
www.shripuram.org

भूतैर्महाद्भिः चन्द्रार्काभ्याम्। कालवह्निग्रहैः कालेन वह्निना ग्रहैश्च। दिङ्नक्षत्रैः दिग्भिर्नक्षत्रैश्चाज्यं हुनेत्। एतेषां नाममन्त्रैराज्यं हुनेदित्यर्थः। अन्ते मूलतो द्रव्यं हुनेत्।।८६।।

विवरणम्

सर्वेष्वपि सप्तविंशतिरेव मन्त्रा भवन्ति, स्कन्दे तु भेदमाह - पक्वान्त इति। नामद्विषट्कं द्वादशनामानि। वक्ष्यति च - स्कन्दो बाण इत्यादि। अत्र पक्वं हुत्वा द्वादशनामभिराज्यहोमः। पूजामन्त्राज्यहोमं पूर्णाहुतिं च कृत्वा लोकपालादिभिराज्यहोमः। सम्प्रदानठयुगयोगोऽत्रापि स्यात्। महद्भिरिति पृथक्पदम्। पूर्णां हुत्वान्ते मूलतश्चतुर्द्रव्यहोम इति।।८६।।

पक्वान्ते षण्मन्त्रकैराज्यमार्ये
हुत्वा गायत्र्या चतुर्द्रव्यकं च।
गोप्त्राद्याख्या षड्युजेन्द्रादिन-
क्षत्रान्तैः स्कन्दोक्तैश्च सर्पिर्जुहोतु।।८७।।

विमर्शिनी

आर्ये पक्वान्ते षण्मन्त्रकैः रेवन्तादिभिः आज्यं हुत्वा गायत्र्या चतुर्द्रव्यकं च हुत्वा। गोप्त्राद्याख्याषड्युजा गोप्त्रादिनामद्वादशकेन। इन्द्रादिनक्षत्रान्तैः स्कन्दोक्तैः स्कन्दस्योक्तैर्मन्त्रैश्च सर्पिर्जुहोतु।।८७।।

विवरणम्

शास्तर्यपि भेदमाह - पक्वान्त इति। षण्मन्त्रकैरिति। वक्ष्यति च 'रेवन्तश्च तथा शास्ते'त्यादि। पूजामन्त्रतदीयपूर्णानन्तरमेव द्रव्यहोमः। गोप्त्राद्याख्याषड्युजेति द्वादशनामानि च। वक्ष्यति च - गोप्ता च पिङ्गलाक्षश्चेत्यादि।।८७।।

स्विष्टकृत्प्रभृतिहोमविरामे प्राप्य सर्पिरपि तासु घटे च।
तद्द्वयं समधिवास्य निशीति स्थापयेत् तदनु ताः सुविलग्ने।।

विमर्शिनी

स्विष्टकृत्प्रभृतिहोमविरामे स्विष्टकृदादिहोमावसाने। सर्पिः संपातमपि। तास्विष्ट-

Shripuram Publications
www.shripuram.org

कासु। घटे कलशे च प्रार्प्य। तद्द्वयं निशि समधिवास्य तदनु ताः इष्टकाः। सुविलग्ने शोभने मुहूर्ते। इति वक्ष्यमाणविधिना स्थापयेत्।।८८।।

विवरणम्

सर्पिः प्रार्प्येति सम्पातस्पर्शनमुक्तम्। पुनस्तन्मन्त्राराधनजपौ न्यायसिद्धौ। तद्द्वयं समधिवास्येति वस्त्राच्छादनादिकमुक्तम्। निशीति। अधिवास्येति सम्बन्धनीयम्। रात्रावेवमधिवास्येत्यर्थः। तदनु ततः पश्चात्। परेद्यवीति यावत्। यदुक्तं 'श्चोभूते प्रासादद्वारदेशं चे'त्यादि। सुविलग्ने मुहूर्ते।।८८।।

प्रासादद्वारस्य वामेतरस्मिन्
पार्श्वोद्देशे भावितत्पादुकान्तः।
भूमिं कृत्वा सुस्थिरां शोधयित्वा
मात्वा क्षेत्रं कल्पयेदिष्टकानाम्।।८९।।

विमर्शिनी

प्रासादद्वारस्य वामेतरस्मिन् दक्षिणे पार्श्वोद्देशे द्वारशाखाधोभागे। भावितत्पादुकान्तः भविष्यतः पादुकस्यान्तर्भागे। भूमिं सुस्थिरां कृत्वा। शोधयित्वा मार्जनादिभिः संशोध्य। मात्वा मानं कृत्वा। इष्टकानां क्षेत्रं यथा, तथा कल्पयेत्।।८९।।

विवरणम्

वामेतरस्मिन्नित्यसन्देहार्थ[१]मभिधानम्। प्राग्द्वारे प्रासादे याम्याया द्वारशाखाया दक्षिणतः प्रत्यग्द्वारे सौम्याया द्वारशाखाया उत्तरत इति। प्रासादग्रहणान्मुखमण्डपसम्भवे तद्ग्रहो न भवति। भावितत्पादुकान्तरिति। भाविनः प्रासादीयपादुकस्य आभ्यन्तरोद्देशे। भूमिं सुस्थिरां कृत्वेति यत्नतोऽपि स्थलदृढीकरणमुक्तम्। यद्वाधारेष्ट[२]कानिधानमुच्यते। शोधयित्वेति। मुष्ट्यादिभिः तत्स्थलशुद्धिरुक्ता। मात्वा क्षेत्रं कल्पयेदिति। सवर्ष्टेकाचित्युपपत्त्या चतुरश्रस्य मानमेकैकेष्टकोपधानोपपत्त्या च तदवान्तरचतुरश्राणां मानमिति ज्ञेयम्। क्षेत्रं च तथाविधं गृह्यते। कल्पनं च रेखे लिखेदित्येतल्लेखनसौकर्यसिद्धये मूलाग्राद्युचितोद्देशाङ्कनं तदुचितरेखोत्किरणं वा भवति[३]। मानकल्पने चौचित्यात् पुरैव तक्षभिः सह कार्ये।।८९।।

---

१. 'र्थमित्य' क. ख., २. 'काधा' ख., ३. 'ति। न मा' ग. पाठः

Shripuram Publications
www.shripuram.org

क्षेत्रे चतुष्पदयुते चतुरश्ररूपे
रेखे लिखेच्छिखिमरुत्पदयोः पुरोग्रे।
तच्छिष्टकोष्ठयुजि पिप्पलशङ्कुनोद-
गग्रे ध्रुवेण सकलेषु शिवेऽस्त्रतो वा।।९०।।

विमर्शिनी

चतुष्पदयुते चतुरश्ररूपे क्षेत्रे। शिखिमरुत्पदयोः अग्निवायुकोणगतपदयोः पुरोग्रे प्रागग्रे। तच्छिष्टकोष्ठयुजि तच्छिष्टयोर्नैर्ऋतीशकोष्ठयोः द्वये उदगग्रे। पिप्पलशङ्कुना अश्वत्थवृक्षनिर्मितशङ्कुना। सकलेषु देवेषु। ध्रुवेण प्रणवेन। शिवेऽस्त्रतो वा रेखे लिखेत्। अयं भावः - त्रिकरवर्गभवे प्रासादे चतुरङ्गुलाधिककरमानेन समचतुरश्रं क्षेत्रं कृत्वा 'यद्वार्काहियुगैर्मिता ततिविततत्युत्सेधवत्योऽङ्गुलैरि'ति कर्मशेषे वक्ष्यमाणरीत्या द्वादशाङ्गुलदीर्घा अष्टाङ्गुलविस्तृताश्चतुरङ्गुलोत्सेधाश्चाष्टेष्टका ईशवाय्योः पूर्वापरायता इतरयोरन्यथारूपाश्च स्थाप्याः। तथा सति मध्ये चतुरङ्गुलसमविस्तारस्य गर्भपात्रस्य गर्तं भवतीति।।९०।।

विवरणम्

क्षेत्रे इति। प्रागादिचतुष्पर्यन्तेषु प्रागुदगग्रतया प्रदक्षिणक्रमेण रेखा लिखंश्चतुरश्रं विदध्यात्। पुनस्तस्मिन्नायतचतुरश्ररूपपदचतुष्टययुततया प्रागेव कल्पिते सत्याग्नेयपदे प्रागग्रे द्वे रेखे नैर्ऋतपदे सौम्याग्रे वायव्यपदेऽपि प्रागग्रे पुनरैशानपदे च उदगग्रे प्रदक्षिणक्रमतो लिखेदिति प्रयोगक्रमोऽभिप्रेतः। तथाच तत्क्षेत्रोदरे परमल्पचतुरश्रं निष्पन्नं भवेदिति। ध्रुवः प्रणवः।।९०।।

पीठं वर्मसमुक्षितेऽत्र परिपूज्यान्तः स्थितः संस्मरन्
देवं साञ्जलिरीश्वरे गिरिशवारं मूलमष्टावरम्।
अन्येष्वप्यभिजप्य वह्निचितिमासूद्वास्य चाष्टेष्टका-
श्चिन्वीतोन्नतिनिम्नते परिहरंस्तुल्या यथोपानहा।।९१।।

विमर्शिनी

अथ वर्मसमुक्षिते अत्र स्थले पीठं परिपूज्य। अन्तः स्थितः अन्तर्भागे तिष्ठन्।

Shripuram Publications
www.shripuram.org

साञ्जलिरञ्जलियुक्तो देवं संस्मरन्। ईश्वरे शिवे। गिरिशवारम् एकादशवारम्, अन्येष्वष्टावरमपि मूलमभिजप्य। वह्निचितिं वह्निचैतन्यम्। आसु इष्टकासूद्वास्याष्टेष्टकाश्च यथा उपानहा तुल्या भवन्ति तथोन्नतिनिम्नते परिहरन् उन्नतिं निम्नतां च परिहरंश्चिन्वीत।।९१।।

विवरणम्

अत्र वर्मसमुक्षिते पीठं परिपूज्येत्यन्वयः। अन्तः स्थितः साञ्जलिर्देवं संस्मरन्निति। प्रासादान्तर्ब्रह्मभागे स्थितस्य देवस्य तत्सन्निधाववस्थितेनाभिध्यानमेतत् प्रासादनिर्माणप्रारम्भाभ्यनुज्ञापनार्थमिति। यद्वान्तर्देवं संस्मरन्निति स्वहृद्येव पश्चात् ब्रह्मस्थानभाजि बिम्बे समावाह्यस्य देवस्यानुसन्धानमुक्तम्। चिन्वीतेति। चयनमुपधानम्। उन्नतिनिन्मते परिहरन्निति परस्परापेक्षं, मिथस्समा यथा स्युः तथा चिन्वीतेति स्वसीमापेक्षं वा। तदेतदाह - तुल्या यथोपानहेति। तथा चिन्वीतेति सोपस्कारमन्वयः। यदुक्तम् - "उपान(ध्व?द्व)त् प्रयुञ्जीत वर्जयेन्निम्नमुन्नतम्" इति।।९१।।

ईशेऽष्टाभिः सद्यजाभिः कलाभि-
र्वह्न्यंशादीशांशनिष्ठं क्रमेण।
लक्ष्मीशोमाश्रीशयोर्मूलवर्णै-
श्चिन्वीतान्येषु स्वमूलेन चैनाः।।९२।।

विमर्शिनी

एना इष्टकाः। वह्न्यंशादीशांशनिष्ठं वह्न्यंशमारभ्येशांशेऽवसानं यथा भवति तथा क्रमेण। ईशे सद्यजाभिः कलाभिः अष्टाभिः सद्योजातकलाभिः। लक्ष्मीशोमाश्रीशयोः विष्णुशङ्करनारायणयोः। मूलवर्णैर्मूलमन्त्रस्याक्षरैः। अन्येषु स्वस्वमूलेन च चिन्वीत।।९२।।

विवरणम्

क्रमेणेति। वह्निभागे द्वे इष्टके उत्तरदक्षिणपदयोरुपधेये। नैर्ऋतभागे प्राक्पश्चिमपदयोरित्यादिरूपः क्रम उक्तः। प्रणवरुद्धा नमोन्ता इह मन्त्राः स्युः।।९२।।

Shripuram Publications
www.shripuram.org

आवाह्यात्र निजेन मूलमनुना देवं सहाङ्गं यजेदा-
लिप्यामलया मृदा कलशवारापूर्य गर्भावटम्।
वीक्षेताक्षतसूनमोमिति जपन् क्षिप्त्वा जलावर्तकं
वामावर्तसमुद्भवेऽस्त्रहुतसंपातं च संपातयेत्॥९३॥

विमर्शिनी

अत्र निजेन मूलमनुना देवमावाह्य। सहाङ्गम् अङ्गैः सहीतं यजेत्। अमलया मृदा तद्विवरमालिप्य। कलशवारा कलशजलेन। गर्भावटं गर्भस्थानगर्तमापूर्य ओमिति जपन् अक्षतसूनं तत्र जले क्षिप्त्वा जलावर्तं वीक्षेत। वामावर्तसमुद्भवे वामगत्यावर्ते जाते सति तत्प्रायश्चित्तार्थम् अस्त्रहुतसंपातं चास्त्रेणाज्यं हुत्वा तत्संपातं च संपातयेत्॥९३॥

विवरणम्

यजेदिति मूलजपोपलक्षणम्। ओमिति जपन् अक्षतसूनं क्षिप्त्वा जलावर्तकं वीक्षेतेत्यन्वयः। सूनं पुष्पं, तच्च शुक्लमिति सम्प्रदायः॥९३॥

मनुवरमहितं महास्त्रगुप्तं विभुमभिकल्प्य तथेष्टकाश्चतस्रः।
तदुपरि विनिधाय धान्यमृद्भिर्दृढमवटं परिपूर्य साधु रक्षेत्॥९४॥

विमर्शिनी

मनुवरमहितं महास्त्रगुप्तं मूलमन्त्रपूजितं स्वस्वमहास्त्रेण रक्षितम्। विभुं देवमभिकल्प्य। तथा तदुपरि तासामिष्टकानामुपरि चतस्र इष्टकाश्च विनिधाय। धान्यमृद्भिर्धान्यैर्मृद्भिश्च। अवटं गर्तं दृढं परिपूर्य। साधु यथावद् रक्षेत्॥९४॥

विवरणम्

मनुवरमहितमिति। पुनरपि मूलेन किञ्चिद्यजनमुक्तम्। महास्त्रगुप्तमिति स्वास्त्रेण तालत्रयादिकमुक्तम्। महद्विशेषणं त्वादरार्थम्। साधु रक्षेदिति। पुनरपि तालत्रयादिकं लौकिकपुरुषै रक्षाकरणं चोक्तम्। यदुक्तम् - 'त्रिरात्रं रक्षाविधानं कृत्वा ततः कर्म समारभेत' इति। 'त्रिरात्रं विष्णुभूतास्तत्र क्रीडन्तीति' च। विष्णुग्रहणं शिवाद्युपलक्षणार्थमिति॥९४॥

Shripuram Publications
www.shripuram.org

ततः समभ्यर्चितवास्तुरत्र शुभेऽह्नि गर्भोचितसाधनानि।
संभृत्य मन्त्री विनिधाय वह्निं समारभेतोत्तरतोऽग्निकार्यम्।।९५।।

विमर्शिनी

ततः शुभेऽह्नि शुभदिवसे रात्रावत्रापि। समभ्यर्चितवास्तुः सम्यग् वास्तुबलिकृत्। मन्त्री आचार्यः। स्वयं गर्भोचितसाधनानि गर्भाधानयोग्यानि साधनानि संभृत्य तस्य गर्भन्यासस्थानस्योत्तरतो वह्निं विनिधाय। अग्निकार्यं होमकर्म समारभेत।।९५।।

विवरणम्

गर्भाधानं प्रस्तौति। तत इति। समभ्यर्चितवास्तुरिति। पूर्वस्यां रात्रावियं वास्तुपूजा भवति। गर्भोचितसाधनानि सम्भृत्येति। दुस्सम्पादसम्भारसम्भवात् सम्भारभूयस्त्वाद् वा एतदभिधानम्। यद्वा नात्र प्रतिनिधानमुचितमिति। मन्त्रीति स्नानादिपूर्वकमात्मनः सकलीकरणादिकमुक्तम्। समारभेतेति परिधिनिधानादर्वाक्तनमुक्तम्।।९५।।

न्यस्य न्यग्बिलमग्निदक्षिणदिशि व्रीह्यादिमन्मण्डले
पात्रं ताम्रमयं पिधानसहितं गव्यादिसंशोधितम्।
पीठाराधनपूर्वमत्र कृतसंस्कारे समुत्तानिते
कुर्यात् सागरमृद्वृतिं धृतहिरण्येनाग्रदोष्णा सुधीः।।९६।।

विमर्शिनी

अग्निदक्षिणदिशि अग्नेर्दक्षिणभागे। व्रीह्यादिमन्मण्डले व्रीह्यादिभिर्विरचितपीठे मण्डले। ताम्रकृतं ताम्रेण कृतम्। पिधानसहितमुत्तरच्छदेन सहितम्। गव्यादिसंशोधितं गव्याष्टगन्धजलैः क्षालितम्। पात्रं गर्भपात्रम्। न्यग्बिलम् अधोमुखं न्यस्य। पीठाराधनपूर्वं पीठाराधनं पूर्वं यथा भवति तथा। कृतसंस्कारे प्राणायामादिभिः संस्कृते। समुत्तानिते सम्यगुत्तानीकृतेऽत्र। धृतहिरण्येन हिरण्मयपवित्रसहितेन। अग्रदोष्णा कराग्रेण। सागरमृद्वृतिं समुद्रमृत्तिकया वृतिं सीमानं कुर्यात्। सुधीरिति सागरमृदा वृतिकल्पनायां तस्य पात्रस्य भूमण्डलरूपेण ध्यानमुक्तम्।।९६।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

व्रीह्यादिमन्मण्डल इति। स्वस्तिकमष्टदलकमलं वा मण्डलमालिख्य तत्र वस्त्रान्तरितैर्व्रीहितण्डुलादिभिः पीठं विधाय तस्मिन्नित्यर्थः। गर्भपात्रलक्षणमपि कर्मशेषे भविष्यति। गव्यादिसंशोधितमिति केवलोदकगोमूत्रगव्यगन्धजलादय उक्ताः। कृतसंस्कार इति, गन्धालपेनसन्धूपनशोषणादयः। अग्रदोष्णेति। हस्ताग्रेण। सुधीरिति। "भूमण्डलमनन्तस्थं सशैलाम्भोधिदिग्गजम्" इत्येवमभिध्यावकुशल इति भावः। अनेन तत्र प्रथममनन्तसन्निधानमपि समुचितमिति सूचितम्।।९६।।

कुड्यश्लेषमिह प्रकल्प्य वृतिमादावन्तरालस्थितं
प्रत्यक्प्राक्स्थमवागुदक्स्थमपि रेखाद्वन्द्वमापादयेत्।
पात्रेऽस्मिन् नवखण्डमण्डितमहीसंस्थानरूपे स्फुर-
द्वर्णाम्भोजचितीति तत्तदुदितद्रव्याणि विन्यस्यतु।।९७।।

विमर्शिनी

इह गर्भपात्रे आदौ वृतिम्। कुड्यश्लेषं कुड्ये श्लिष्टं[1] यथा तथा प्रकल्प्य। प्रत्यक्प्राक्स्थं प्राक्प्रत्यग्गतम्। अवागुदक्स्थं दक्षिणोत्तरगतमप्यन्तरालस्थितं रेखाद्वन्द्वम्। आपादयेत् कुर्यात्। नवखण्डमण्डितमहीसंस्थानरूपे नवभिः खण्डैर्मण्डितायाः पृथिव्याः संस्थानस्वरूपे। स्फुरद्वर्णाम्भोजचिति लिपिपङ्कजपूजया स्फुरल्लिपिपङ्कजचैतन्ययुक्तेऽस्मिन् पात्रे। तत्तदुदितद्रव्याणि तस्य तस्य देवस्योक्तानि द्रव्याणि। इति वक्ष्यमाणविधिना विन्यस्यतु।।९७।।

विवरणम्

सागरमृद्वृतिप्रकारं दर्शयति - कुड्यश्लेषमिति। क्रियाविशेषणमेतत्। इहेति तस्मिन् पात्रे। गर्भपात्रस्य चतुर्दिशमुन्नतो भित्तिस्थानीयोऽवयवः कुड्यमभिप्रेयते। तत्र श्लेषो यथा भवति तथा प्रथमतः प्रागादिप्रदक्षिणतया वृतिं विधाय पुनस्तदन्तर्भागे पश्चादारभ्य प्राक्संस्थं दक्षिणत आरभ्य उदगन्तं च रेखाद्वयं सागरमृदैव रचयेत्। प्रत्यक्प्रागित्येवमाकारेण तिष्ठतीति प्रत्यक्प्राक्स्थम्, एवमवागुदक्स्थम् इत्येतदपि। अवाग् दक्षिणम्। नवखण्डमण्डितमहीसंस्थानरूप इति। भारतादिनवखण्डैर्मण्डिता मही इयं

---

१. 'श्लेषं य' ख. पाठः

Shripuram Publications
www.shripuram.org

भूमिः तस्या एवेयं गर्भपात्रतलाकारेण नवखण्डयोगितया स्थितिश्चिन्तनीयेति भावः। पूर्वमिह सन्निधापितानन्तशिरोवर्तितया भूमेस्तन्मन्त्रेणास्मिन् पात्रे सन्निधापनमपि सूचितम्। स्फुरद्वर्णाम्भोजचितीति, लिपिपङ्कजपूजनमुक्तम्। इतिशब्दो वक्ष्यमाणपूजनप्रकारार्थः।।९७।।

मृन्मूलधातुमणिबीजकलोहक्लृप्त्या
द्रव्यार्पणं भवति सर्वसुपर्वगर्भे।
स्कन्देऽथ वाहमणिलोहकधातुबीज-
मृत्कन्दकक्रमतयेत्यपि वा प्रभेशे।।९८।।

विमर्शिनी

सर्वसुपर्वगर्भे सर्वेषां सुपर्वणां देवानां गर्भे। मृन्मूलधातुमणिबीजकलोहक्लृप्त्या मृदः मूलानि धातवः मणयो रत्नानि बीजानि लोहानि इति क्लृप्त्या द्रव्यार्पणं द्रव्याणामर्पणं भवति। अथ स्कन्दे वाहमणिलोहकधातुबीजमृत्कन्दकक्रमतया (स्व?)वाहाः स्ववाहनादीनि मणयः लोहानि धा(तूनि?तवः) बीजानि मृदः कन्दाः इति क्रमतया भवति। प्रभेशेऽपीति द्रव्यार्पणम्।।९८।।

विवरणम्

अथ तत्तद्द्रव्याणि समुच्चयतो विवक्षन् प्रथमं तेषां हरिहरादिविषयं क्रमं दर्शयति - मृन्मूलेति। मणयो रत्नानि लोहशब्देन सुवर्णादीनां तद्विकृतवाहनादीनामपि ग्रहणम्। सुपर्वाणो देवा हरिहरादयः, कन्दकानि मूलानि इति। अपि वा प्रभेश इति। एवं स्कन्दोक्तक्रमेण वेत्यर्थः।।९८।।

भूभृत्तीर्थतरङ्गिणीह्रदकुलीरावासवल्मीकभू-
धान्यागारगजोक्षशृङ्गजमृदो दिक्कोणमध्ये न्यसेत्।
सेनानीतरदेवतास्वाधिदिशं पाथोजनीलोत्पलो-
त्पन्ने कैरवलोहितोत्पलसमुत्पन्ने च मूलान्यपि।।९९।।

विमर्शिनी

सेनानीतरदेवतासु स्कन्देतरेषु। भूभृत्तीर्थतरङ्गिणीह्रदकुलीरावासवल्मीकभूधान्या-

Shripuram Publications
www.shripuram.org

गारगजोक्षशृङ्गजमृदः भूभृत् पर्वतः तीर्थं प्रसिद्धं तरङ्गिणी नदी कुरीरावासः कर्कटकगुहा वल्मीकभूः वल्मीकभूमिः धान्यागारं खलः गजोक्षशृङ्गे गजशृङ्गमुक्षशृङ्गं च तेभ्यो जाता मृदः। दिक्कोणमध्ये पूर्वादिदिक्षु अग्न्यादिकोणेषु मध्ये च न्यसेत्। अधिदिशमिति सप्तम्यर्थेऽव्ययीभावः, दिक्ष्वित्यर्थः। तत्पूर्वादीत्यर्थात्। पाथोजनीलोत्पलोत्पन्ने पाथोजं पद्मं नीलोत्पलं कुवलयं ताभ्यामुत्पन्ने द्वे, कैरवलोहितोत्पलसमुत्पन्ने च कैरवं कुमुदं (ലോഹിതോത്പലം = ചെങ്ങഴിനീർ) ताभ्याम् उत्पन्ने च द्वे इति चत्वारि मूलान्यपि न्यसेत्।।९९।।

विवरणम्

भूभृत् पर्वतः तरङ्गिणी नदी धान्यागारं खलं वल्मीकादिभ्यो भवन्ति धान्यागारादिभ्यो जायन्त इति च कृत्समासः। सेनानीतरदेवतासु स्कन्दव्यतिरिक्तेषु देवेषु पूर्वत्रापि सम्बन्धनीयमेतत्। अधिदिशमिति। पूर्वादिचतुर्दिक्षु।।९९।।

न्यस्येन्मनोह्वां हरितालमञ्जनं
श्यामं च पूर्वादिशिवान्तिमं क्रमात्।
ससीससौराष्ट्र्यभिधानरोचनं
सगैरिकं पारतमत्र मध्यतः।।१००।।

विमर्शिनी

अत्र सेनानीतरदेवतासु। पूर्वादिशिवान्तिमं क्रमाद् मनोह्वां मनश्शिलाम्। (മനശ്ശില = മനയോല) हरितालं तदेव। अञ्जनं श्यामं च ते एव। ससीससौराष्ट्र्यभिधान-रोचनं सीसेन युक्ते सौराष्ट्र्यभिधानरोचने। (സീസം = ഈയം, സൗരാഷ്ട്രി = തിരുവട്ടപ്പശ, രോചന = ഗോരോചനം) तत्रैकवद्भावः। सगैरिकं पारतं गैरिकसहितं पारतम्। गैरिकं पारतं चेत्यर्थः। (ഗൈരികം = ചെങ്കൽധാതു, പാരതം = രസം) तत्र मध्यतश्च।।१००।।

विवरणम्

पारतं रसम्। सेनानीतरदेवतास्वित्येतदिहाप्यनुवर्तते।।१००।।

वज्रं मौक्तिकवैडूर्यकशङ्खस्फटिकपुष्यकं षट्सु।

Shripuram Publications
www.shripuram.org

चन्द्रोपलं महानीलं तद्वन्न्यसतु चाब्जरागमपि।।१०१।।

विमर्शिनी

षट्सु स्कन्दरहितेषु षट्सु देवेषु। (വജ്രം = വൈരം) मौक्तिकवैडूर्य(क)शङ्ख-स्फटिकपुष्यकम् (മൗക്തികം = മുത്ത്) वैडूर्यं तदेव। शङ्खस्फटिकपुष्यकाणि च तान्येव। (ചന്ദ്രോപലം = ചന്ദ്രകാന്തം) महानीलं तदेव। अब्जरागमपि पद्मरागं च। तद्वत् पूर्वादिमध्यान्तेषु न्यसतु।।१०१।।

विवरणम्

षट्स्वित्यनुवादमात्रम्। तद्वदिति पूर्वादिशिवान्तिम् क्रमादित्यर्थः।।१०१।।

तथा शालिनीवारकौ कङ्कुमाषौ
कुलस्थं सनिष्पावसंज्ञं तिलं च।
समुद्गं ससिद्धार्थकं सन्निदध्या-
द्धरौ साजितेशार्यसुम्भाभिमातौ।।१०२।।

विमर्शिनी

साजितेशार्यसुम्भाभिमातौ शङ्करनारायणशास्तृदुर्गासहिते हरौ। तथा क्रमेण। शालिनीवारकौ। (ശാലി=നെല്ല്, നീവാരം=വരിനെല്ല്) कङ्कुमाषौ (കംകു=കണ, മാഷം=ഉഴുന്ന്) कुलस्थं (കുലസ്ഥം=മുതിര) सनिष्पावसंज्ञम्। (നിഷ്പാവം= തുവര) तिलं च। (തിലം=എള്ള്) समुद्गम्। (മുദ്ഗം=ചെറുപയറ്) ससिद्धार्थकम्। (സിദ്ധാർത്ഥം=കടുക്) एतानि सन्निदध्यात् स्थापयेत्।।१०२।।

विवरणम्

तथेति। एतदपि तद्वत्। सुम्भाभिमातिर्दुर्गा।।१०२।।

सुवर्णरजतायसत्रपु निधाय दिक्ष्वन्यतः
सुवर्णमयमर्पयेद् गरुडकूर्मशङ्खारि च।
शरासनगदाम्बुजं न्यसतु हैममन्तर्हरौ
सुपर्णपदसिंहकान्यपि तु तानि सुम्भद्विषि।।१०३।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

हरौ दिक्षु सुवर्णरजतायसत्रपु। (സുവർണം=പൊന്ന്, രജതം=വെള്ളി, ആയസം=ഇരുമ്പ്, ത്രപു=ചെമ്പാകൊട്ടി) एतानि निधायान्यतः कोणेषु। सुवर्णमयं सुवर्णकृतम्। गरुडकूर्मशङ्खारि च गरुडं कूर्मं शङ्खं चक्रं च। अन्तः अन्तर्भागे। हैमं हेमकृतम्। शरासनगदाम्बुजं शरासनं धनुः गदामम्बुजं पद्मं च न्यसतु। सुम्भद्विषि दुर्गायामपि। सुपर्णपदसिंहकानि गरुडस्थाने सिंहयुक्तानि तानि न्यसतु।।१०३।।

विवरणम्

अन्यत इति। कोणेषु। अरि चक्रम्। शरासनं धनुः। सुपर्णपदसिंहकानीति। गरुडस्थाने स्ववाहनं सिंहम्। इतराणि तु तान्येवेत्यर्थः। अत्र हरिहरस्य शास्तुश्च व्यावृत्तिः।।१०३।।

त्रष्वन्तं हरिवद् विधाय विदिशास्वार्येशनारायणे
न्यस्येच्छूलपरश्वधं दररथाङ्गं चाथ शार्ङ्गीश्वरे।
खट्वाङ्गार्धविधूक्षतार्क्ष्यकमठाक्षस्रग्गदाब्जं धनु-
र्हैमं शास्तरि हैमतोमरशराम्भोजं च मध्ये न्यसेत्।।१०४।।

विमर्शिनी

आर्येशनारायणे शास्तृशङ्करनारायणे। हरिवत् हराविव। त्रष्वन्तं सुवर्णरजतायसत्रपुपर्यन्तम्। दिक्षु विधाय कृत्वा। विदिशासु कोणेषु। शूलपरश्वधं शूलं कुठारं च। दररथाङ्गं च शङ्खं चक्रं च न्यस्येत्। अथ शाङ्र्गीश्वरे शङ्करनारायणे। हैमं हेमकृतम्। खट्वाङ्गार्धविधूक्षतार्क्ष्यकमठाक्षस्रग्गदाब्जं धनुश्च खट्वाङ्गं तदेव अर्धविधुः अर्धचन्द्रः अक्षा ऋषभः तार्क्ष्यो गरुडः कमठः कूर्मः अक्षस्रग् अक्षमाला गदा सैव अब्जं पद्मं धनुः तदेव एतानि मध्ये न्यसेत्। शास्तरि मध्ये। हैमतोमरशराम्भोजं च हैमानि तोमरशराम्भोजानि। (തോമരം=പീലിക്കുന്തം) शरं तदेव। अम्भोजं पद्मं विन्यसेत्।।१०४।।

विवरणम्

अनयोस्त्वाह - त्रष्वन्तम् इति। सुवर्णरजतायसत्रष्वित्येतावत् समानमित्यर्थः।

Shripuram Publications
www.shripuram.org

दरः शङ्खः। अथेति मध्ये न्यसेदित्यनेन सम्बन्धः। हैममिति सर्वविशेषणम्।।१०४।।

अथ शिवे सर्वमाह -

बीजे तानि न्यसतु नव नीवारकङ्क्वन्तरोद्य-
च्छ्यामानीशे च्युतचरमराजीनि लोहेऽनुरूप्यम्।
ताम्रं सायस्त्रपु कमठपाथोजशूलं च हैमं
खट्वाङ्गार्धेन्द्वृषभधनुरन्तः कुठारं च पञ्च।।१०५।।

विमर्शिनी

ईशे बीजात् पूर्वं सर्वं तथा न्यस्य बीजे बीजन्यासे। नीवारकङ्क्वन्तरोद्यच्छ्यामानि नीवारकङ्क्वोरन्तरा मध्ये उद्यदुद्गच्छत् श्यामं येषां तानि तथा। (ശ്യാമം=ചാമ) च्युतचरमराजीनि च च्युतं चरममवसानीभूतं राजि येषां बीजानां तानि च्युतचरमराजीनि। तानि नवबीजानि तथा न्यसतु। लोहे लोहन्यासे। अनुरूप्यं रूप्यानन्तरम्। ताम्रं सायस्त्रपु अयसा युक्तं त्रपु। (അയസ്സ്=ഇരിമ്പ്) त्रपु उक्तम्। हैमं कमठपाथोजशूलं कमठं कूर्मं पाथोजं पद्मं शूलं तदेव। इति दिक्षु न्यस्यान्तः हैमं खट्वाङ्गार्धेन्द्वृषभधनुः कुठारम्। (കുഠാരം=വെണ്മഴു) इति पञ्च न्यसतु।।१०५।।

विवरणम्

अथ शिवे सर्वमाह - बीज इति। बीजे प्राप्ते तान्येव शालिनीवारकादीन्येव नव न्यस्येत्। किन्त्विह नीवारं कङ्कुं चान्तरा श्यामं न्यसेत्। चरमस्मिन् राजिश्चेह च्युतः स्यादित्यर्थः। लोहेऽनुरूप्यमिति। रूप्यस्य पश्चात् सुवर्णरजतयोरनन्तरमित्यर्थः। अनेन दिगावारणमेव शूलपर्यन्तमिति गम्यते। हैममिति सर्वविशेषणम्। अन्तः पञ्चेति। खट्वाङ्गादिपञ्चकस्य स्थानमुक्तम्। अयमपरो गण इति चार्थादवसीयते।।१०५।।

बीजानि लोहानि च विघ्नराजे
महेशवन्न्यस्य ततो निदध्यात्।
चाषस्वदन्ताम्बुरुहाङ्कुशानि
दिशासु मध्येऽत्र गजं च हैमम्।।१०६।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

विघ्नराजे बीजानि लोहानि च। महेशवत् शिववद् न्यस्य। हैमानि चाषस्वदन्ताम्बुरुहाङ्कुशानि (ചാഷം=എലി) स्वदन्तं स्वस्य दन्तम् अम्बुरुहं पद्मम् (അങ്കുശം=തോട്ടി) एतानि दिशासु निदध्यात्। अत्र मध्ये हैमं गजं च निदध्यात्।।१०६।।

विवरणम्

चाषो मूषिकः। दिशास्विति चतसृषु। हैममिति सर्वविशेषणम्।।१०६।।

अथ गुहे सर्वमाह -

शिखिशक्तिताम्रचूडस्वरुकरिणः स्वर्णजान् गुहे न्यस्येत्।
पूर्वादिमध्यनिष्ठं मध्यादीशान्तमथ नवैतानि।।१०७।।

वारिजरागं वज्रं मौक्तिकवैडूर्यसंज्ञिते स्फटिकम्।
शङ्खं नीलं पुष्यं प्रवालसंज्ञं च विन्यसेत् क्रमशः।।१०८।।

विमर्शिनी

गुहे पूर्वादिमध्यनिष्ठं पूर्वादिचतुर्दिक्षु मध्ये च स्वर्णजान् सुवर्णकृतान्। शिखिशक्तिताम्रचूडस्वरुकरिणः। (ശിഖി=മയിൽ, ശക്തി=വേൽ, താമ്രചൂഡം=കോഴി, സ്വരു=വജ്രം, കരി=ആന) अथ मध्यादीशान्तं वारिजरागं पद्मरागम्। (വജ്രം=വൈരം) मौक्तिकवैडूर्यसंज्ञिते (മൗക്തികം=മുത്ത്) वैडूर्यं तदेव। स्फटिकं शङ्खं नीलम्। पुष्यं पुष्यरागम्। (പ്രവാളം=പവിഴം) एतानि नव क्रमशो विन्यसेत्।।१०७, १०८।।

विवरणम्

अथ गुहे सर्वमाह - शिखिशक्तीति। शिखी मयूरः। ताम्रचूडः कुक्कुटः। स्वरुर्वज्रः। करी गजः।।१०७।।

वारिजरागं पद्मरागम्।।१०८।।

तद्बाह्ये तपनीयं रजतं ताम्रायसी त्रपु सनागम्।
पित्तलकांस्ये न्वस्येद् दिक्ष्वष्टास्वन्तरष्ट लोहानि।।१०९।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

तद्बाह्ये पूर्वाद्यष्टासु दिक्षु (തപനീയം=പൊന്ന്, രജതം=വെള്ളി) ताम्रायसी उक्ते। त्रपु उक्तम्। सनागम्[1]। पित्तलकांस्ये। (പിത്തളം=പിത്തള, കാംസ്യം= വെള്ളോട്) अन्तरुक्तान्यष्ट लोहानि।।१०९।।

विवरणम्

तपनीयं सुवर्णम्। अन्तरष्ट लोहानीति। एतान्येवेति बोद्धव्यम्।।१०९।।

न्यसतु रसं समनोह्वं हरितालाञ्जनकमाक्षीकश्यामम्।
सौराष्ट्रीं राजावर्तं च तथा गैरिकं च मध्यादि।।११०।।

सिद्धार्थशालियवगोधूमांस्तिलमाषकौ प्रियङ्गुं च।
मुद्गं नीवारकमपि तद्वदिह न्यसतु पञ्चमावरणे।।१११।।

सागरशैलसरित्तीर्थह्रदकेदारदन्तिखलजाताः।
मृत्स्ना न्यस्येत् परितो दिक्ष्वष्टास्वष्ट मृत्तिकाश्चान्तः।।११२।।

विमर्शिनी

तथा मध्यादीशान्तं, रसं तदेव। समनोह्वं हरितालाञ्जनकमाक्षिकश्यामं (മനോഹ്വാ=മനയോല, ഹരിതാലം=അരിതാലം, അഞ്ജനം=അഞ്ജന കല്ല്, മാക്ഷികം=മാക്കീരം) श्यामं तदेव (സൗരാഷ്ട്രീ=തിരുവട്ടപ്പയൻ) राजावर्तं तदेव। (ഗൈരികം=ചെങ്കൽധാതു) एतानि न्यसतु।।११०।।

इह गुहे पञ्चमावरणे सिद्धार्थशालियवगोधूमान्। (ഗോധൂമം=കോതമ്പു) तिलमाषकौ उक्तौ। प्रियङ्गुम्। (പ്രിയംഗു=തിന) मुद्गं नीवारकमपि उक्ते। तद्वद् धातुवद् न्यसतु।।१११।।

परितः पूर्वाद्यष्टासु दिक्षु। सागरशैलसरित्तीर्थह्रदकेदारदन्तिखलजाताः। (സാഗരം=സമുദ്രം, ശൈലം=പർവ്വതം, സരിൽ=നദി) तीर्थं तदेव। (ഹ്രദം=കയം, കേദാരം=കണ്ടം, ദന്തി=ആന, ഖലം=കളം) एतेभ्यो जाताः। मृत्स्नाः मृत्तिकाः न्यस्येत्। अन्तरुक्ता अष्ट मृत्तिकाश्च न्यस्येत्।।११२।।

---

१. 'गं गगनं पि' ख. ग. घ. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

मध्यादीति। ईशान्तमिति शेषः। तद्वदिति। मध्यादीशान्तमित्यर्थः। अष्ट मृत्तिका इति। एता एव।।११०-११२।।

नीलारुणोत्पलपयोरुहकैरवाणां
मूलानि दिक्षु सकलं च निधाय मध्ये।
प्रोक्ष्यास्त्रतः समवगुण्ठ्य तनुत्रतोऽत्र
तद् द्रव्यजातममृतीकृतमातनोतु।।११३।।

विमर्शिनी

नीलारुणोत्पलपयोरुहकैरवाणाम्। (നീലോല്പലം=കരിംകൂവളം, അരുണോല്പലം=ചെങ്ങഴിനീർ, പയോരുഹം=താമര, കൈരവം=ആമ്പൽ) एतेषां मूलानि दिक्षु, सकलं मूलचतुष्कमपि मध्ये च निधाय। अत्र गुहे। अस्त्रतः प्रोक्ष्य। तनुत्रतः कवचमन्त्रेणावगुण्ठ्याच्छाद्य। तद् द्रव्यजातं द्रव्यसमूहम्। अमृतीकृतं सुरभिमुद्रयामृतीकृतमातनोतु।।११३।।

विवरणम्

सकलं चेति। एतदेव मूलचतुष्टयम्। समवकुण्ठ्य तनुत्रत इति कवचेन करद्वयेना[1]च्छादनमुक्तम्। द्रव्यजातं द्रव्यनिचयं, अमृतीकृतमातनोत्विति। सुरभिमुद्रया तद्बीजेनामृतीकृतं भावयेदित्यर्थः। हरिहरादिसर्वेष्वपि कार्यमेतत् सर्वमिति सम्प्रदायः।।११३।।

गायत्र्या स्मरशासने मुररिपौ सस्वार्णमूलाणुना
शेषेषु द्रविणानि विघ्नगुहयोर्मूलेन च न्यस्यतु।
ईशे व्योमदशार्णवक्त्रबहुरूपाजान्ध्रुवामेशसू-
क्तोत्पन्नैश्च कलाणुभिर्द्रविणजातानि न्यसेद्वा क्रमात्।।११४।।

विमर्शिनी

उक्तस्य द्रव्यन्यासस्य मन्त्रमाह - गायत्र्येति। स्मरशासने शिवे। मुररिपौ विष्णौ

---

१. 'न' ग. पाठः

Shripuram Publications
www.shripuram.org

च। गायत्र्या स्वस्वगायत्र्या द्रविणानि विन्यसतु। शेषेषु सस्वार्णमूलाणुना स्वाक्षरसहितेन मूलेन। मूलाक्षरैर्मूलेन चेत्यर्थः। विघ्नगुहयोर्मूलेन च। चशब्द एवार्थे। ईशे शिवे। व्योमदशार्णवक्त्रबहुरूपाजान्धुवामेशसूक्तोत्पन्नैश्च कलाणुभिर्द्रविणजातानि न्यसेद्वा। व्योमदशार्णं व्योमव्यापि दशाक्षरम्। वक्त्रं तत्पुरुषः। बहुरूपोऽघोरः। अजः सद्योजातः। अन्धुरन्धुस्थानस्थो वामदेवः। वामश्च देवः। ईश ईशानः। ऐतेषां सूक्तोत्पन्नैः, कलाणुभिः कलामन्त्रैः। तत्र व्योमव्यापिदशार्णस्य दशभिरक्षरैः मृदः, तत्पुरुषकलाभिर्मूलानि, अघोरकलाभिः धातून्, सद्यकलाभी रत्नानि, वामकलाभिर्बीजानि, पुनरपि वामकलाभिः स्वर्णादीनि, ईशकलाभिः खट्वाङ्गादीनीति विभागः तथा पाशुपते -

"व्योमव्यापिदशार्णैस्तु मृत्पिण्डानि निधापयेत्।
[1]भूयः पुरुषकलाभिर्घोरकलाभिस्तथैव सद्याभिः
[2]न्यस्त्वा वामकलाभिर्वामकलाभिस्तथेशसंज्ञाभिः॥"

इति॥११४॥

विवरणम्

द्रव्यन्यासे मन्त्रानाह - गायत्र्येति। गायत्री तत्पुरुषा(येति)। मुररिपौ सस्वार्णमूलाणुनेति। स्वाक्षरैः सहितेन मूलमन्त्रेण। तत्र दिक्षु मूलाक्षराणि मध्ये मूलमिति विभागः। दुर्गार्येशहरौ चेति। सस्वार्णमूलाणुनेत्यनुषङ्गः। यद्वा विघ्नगुहयोरित्यनेन सह योजनीयम्। शिवे मतान्तरमाह - ईश इति। व्योमव्यापिदशाक्षरेण मृदः पुरुषाघोरसद्य-वामकलाभिर्मूलधातुरत्नबीजानि पुनरपि वामकलाभिर्लोहानि ईशकलाभिस्तु खट्वाङ्गादि-पञ्चकमिति विभागः। तुशब्दो विशेषसूचनार्थः। धातुरत्नानामन्त्यकलयैव मध्ये न्यासः, बीजलोहानामवशिष्टकलाभिरन्त्य[3]न्यास इत्यसौ च विशेषः॥११४॥

तद् द्रव्यजातमजिते द्विषडक्षरेण
गव्येन मूलमनुनोक्षतु चेतरेषु।
अभ्यर्च्य मूलमनुना सकलेऽधिवास्य
पक्वावसानमनले तनुयात् पुरोवत्॥११५॥

---

१. 'त्र' क. पाठः, २. 'नि' ख. पाठः, ३. 'न्त्यस्य न्या' ख. ग. पाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

ततस्तत्संस्कारादिकमाह - तद्द्रव्यजातमिति। अजिते विष्णौ। द्विषडक्षरेण द्वादशाक्षरेण, इतरेषु मूलमनुना च तद् द्रव्यजातं गव्येनोक्षतु। सकलेऽपि मूलमनुनाभ्यर्च्याधिवास्य। अनलेऽग्नौ। पुरोक्तवद् इष्टकाहोमवत् पक्वावसानं तनुयात्।।११५।।

विवरणम्

तद्द्रव्यजातमजित इति। सुरभिमुद्रयाामृतीकरणं तावदुक्तम्। ततोनन्तरमेतत् कार्यम्। मूलमनुनाभ्यर्च्येत्यावाहनादिकमुक्तम्। अथ होमं वदन् तत्र प्रागुक्तहोमे विशेषमाह - पक्वावसानमिति। पक्वात् प्राग्भर्गदुर्गास्मरमुरभिदि मूलाक्षरैरित्येतत् सर्वमिहापि समानमिति (पूर्व?पुरो)वदित्यनेनोक्तम्।।११५।।

अर्काणार्णांश्चतुर्थ्या सह दिगधिपनारायणान् बीजयुक्तान्
सर्वान् धातूंश्च लोहान्[1]मनुविदथ हुनेत् पर्वतान् वै समुद्रान्।
सर्वाण्युद्दिश्य तीर्थान्यपि तदनु नदीश्च ह्रदांश्च द्विठान्तान्
पातालान् नागकान् दिग्गजवृषभयुतान् व्याहृतीस्तारकं च।।

विमर्शिनी

होममन्त्रानाह - अर्काणार्णानिति। मन्त्रप्रयोगकुशलः अर्काणार्णान् द्वादशाक्षरमन्त्रस्य वर्णानुद्दिश्योक्त्वा। चतुर्थ्या सह चतुर्थीविभक्त्या सह। द्विठान्तान् स्वाहान्तान्। दिगधिपनारायणान् दिगधिपान् नारायणं च, इन्द्राय स्वाहा इत्यादीन्[2] नारायणाय स्वाहा इति च। बीजयुक्तान् सर्वबीजेभ्यः स्वाहा इति। सर्वान् धातून् सर्वधातुभ्यः स्वाहा इति। लोहानिति। चकारेण सर्वं क्षिप्यते सर्वत्र, सर्वलोहेभ्यः स्वाहा इति। अत्र लोहपदे लोकपदं केषुचिदागमेषु दृश्यते। तत्र सर्वलोकेभ्यः स्वाहा इति मन्त्रः। पर्वतान् सर्वपर्वतेभ्यः स्वाहा इति। वै समुद्रान् सर्वसमुद्रेभ्यः स्वाहा इति। सर्वाणि तीर्थान्युद्दिश्य इति सर्वतीर्थेभ्यः स्वाहा इति। तदनु नदीश्च सर्वनदीभ्यः स्वाहा। ह्रदान् सर्वह्रदेभ्यः स्वाहा। पातालान् सर्वपातालेभ्यः स्वाहा। नागकान् सर्वनागेभ्यः स्वाहा। दिग्गजवृषभयुतान् सर्वदिग्गजेभ्यः स्वाहा, सर्ववृषभेभ्यः स्वाहा इति। व्याहृतीस्तारकं चोद्दिश्य हुनेत्।।११६।।

---

१. 'का', २. 'दि ना' ख. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

अर्काणर्णानिति। द्वादशाक्षरवर्णान्। दिगधिपा अष्टाविन्द्रादयः। मनुविदित्यस्यायमाशयः - द्वादशाक्षरवर्णाः प्रणवपुटिताः बीजानि पृथग् देवता सर्वशब्दो धातुविशेषणं वृषभशब्दो बहुवचनभागित्यादि ज्ञेयमिति।।११६।।

एतैर्मन्त्रैः प्राग् घृतं शाङ्गर्गपाणौ हुत्वा गायत्र्या चतुर्द्रव्यहोमम्।
कृत्वा संपातैधिते गर्भपात्रे प्रोद्वास्याग्निं मूलमावर्तयेच्च।।११७।।

विमर्शिनी

शाङ्गर्गपाणौ विष्णौ। एतैर्मन्त्रैः प्राक् पूर्वं घृतं हुत्वा। गायत्र्या 'नारायणाय विद्महे' इत्याद्यया। चतुर्द्रव्यहोमं समिदाज्यहविराज्यानां होमं कृत्वा। सम्पातैधिते सम्पातस्पृष्टे। गर्भपात्रेऽग्निं प्रोद्वास्य मूलमावर्तयेच्च जपेत्।।११७।।

विवरणम्

सम्पातैधित इति। सम्पातो नाम द्रव्यकर्मापूर्वं तद् द्रव्यं येन कर्मणा देवतायामुपह्रियते तदेव तदैकात्म्यतस्तदीयफलरूपेण प्रत्यावृत्तमपूर्वं भवति। तेनैधनं स्वकार्यसमर्थतेति।।११७।।

दुर्गार्ये स्वेष्टकावद् द्रविणहवननिष्ठं सशाङ्गर्गीशविघ्ने
कृत्वेन्द्राद्यैश्च नारायणपदविलसत्स्वस्वमूलैर्जुहोतु।
मूलेनैकादशाज्याहुतिमिह सुविधायाथ लोकेशपूर्वै-
रुक्तैर्मन्त्रैश्च नारायणपदबहुसच्छङ्करैः शङ्करे तु।।११८।।

विमर्शिनी

सशाङ्गर्गीशविघ्ने दुर्गार्ये शिवनारायणगणपतिदुर्गाशास्तृषु। द्रविणहवननिष्ठं चतुर्द्रव्यहोमान्तम्। स्वेष्टकावत् स्वस्वेष्टकाहोमवत् कृत्वा। इन्द्राद्यैः 'दिगधिपे'त्याद्युक्तैः। नारायणपदविलसत्स्वस्वमूलैः नारायणमन्त्रस्थाने स्वस्वमूलेन च जुहोतु। शङ्करे तु इह द्रव्यहोमान्ते। मूलेनैकादशाज्याहुतिं सुविधाय। अथ तदनन्तरं लोकेशपूर्वैरुक्तैर्मन्त्रैः नारायणपदबहुसच्छङ्करैः नारायणपदे बहुवचनेन सता शङ्करपदेन च 'ओं शङ्करेभ्यः स्वाहा' इति मन्त्रेण जुहोतु।।११८।।

Shripuram Publications
www.shripuram.org

विवरणम्

नारायणपदविलसस्त्वस्वमूलैरिति। नारायणपदस्थाने स्वं स्वं मूलं योज्यमिति भावः। नारायणपदबहुसच्छङ्करैरिति। तत्पदस्थाने बहुवचनान्तं सच्छङ्करपदं योज्यम्। शङ्करेभ्यः स्वाहेतीत्यर्थः।।११८।।

स्वेष्टकोदितवर्त्मनोडुहुतान्तकृज्जुहुयाद् घृतं
हेतिरत्नकलोहधातुकबीजकान्यपि मृत्तिकाः।
मूलकान्यपि चोद्दिशन्निजनामतोऽथ समिद्घृता-
द्याहुतिं च करोतु तारकसूदने निजमूलतः।।११९।।

विमर्शिनी

तारकसूदने स्कन्दे। स्वेष्टकोदितवर्त्मना स्वेष्टकाहोमोक्तमार्गेण। उडुहुतान्तकृत् नामद्विषट्केनेत्यादिदिङ्नक्षत्रैरित्यन्तैर्होमकृद् भूत्वा। हेतिरत्नकलोहधातुकबीजकान्यपि मृत्तिकाः मूलकान्यपि च निजनामतः। उद्दिशन् उच्चरन् 'ओं हेतिभ्यः स्वाहा' 'रत्नेभ्यः स्वाहा' 'लोहेभ्यः स्वाहा' 'धातुभ्यः स्वाहा' 'बीजेभ्यः स्वाहा' 'मृत्तिकाभ्यः स्वाहा' 'मूलेभ्यः स्वाहा' इति मन्त्रानुच्चरन् घृतं जुहुयात्। अथ निजमूलतः समिद्घृताद्याहुतिं चतुर्द्रव्यहोमं च करोतु।।११९।।

विवरणम्

स्कन्द आह - स्वेष्टकेति। पक्वान्ते नामद्विषट्केनेत्युक्तैर्द्वाशनामादिन क्षत्रान्तैर्हुत्वा हेतिरत्नादिमूलान्तैरपि हुत्वा पूर्णां जुहुयादित्यर्थः।।११९।।

शिखिशक्तिपविस्थलस्थिताश्व-
क्षुरिकासीनि गुहोदितानि वार्ये।
न्यसनेऽत्र निजेष्टकोडुहोमा-
वसितौ हेतिमुखाहुतिस्तथा[१] स्यात्।।१२०।।

विमर्शिनी

आर्ये न्यसने द्रव्यन्यासे। शिखिशक्तिपविस्थलस्थिताश्वक्षुरिकासीनि मयूरशक्तिवज्र-

---

१. 'दा' इति मूलकोशपाठः

Shripuram Publications
www.shripuram.org

स्थानेषु अश्वक्षुरिकाखड्गानि। गुहोदितानि स्कन्दोक्तानि वा स्युः। अत्रैतत्पक्षे। निजेष्टकोड्डु-होमावसितौ स्वस्येष्टकाहोमवन्नक्षत्रहोमान्ते। हेतिमुखाहुतिः हेत्यादीनामाहुतिः। तथा तद्वदेव स्यात्।।१२०।।

विवरणम्

अथ यत् पूर्वमित्यपि वा प्रभेश इत्युद्दिष्टं तदिदानीं विवृणोति - शिखिशक्तीति। पविर्वज्रम्। असिः क्षुरिका। न्यसने स्युरिति शेषः। अत्र निजेष्टकोड्डुहोमावसिताविति। सम्पातैधित इत्यादि सर्वेष्वपि कार्यमिति।।१२०।।

हृत्वेष्टकागर्तगतं मृदाद्यं संशोध्य गव्यादिसमाप्लुतेऽत्र।
सविष्टरेऽभ्यर्चितयोगपीठे शक्तिं समावाह्य निजां यजेत।।१२१।।

विमर्शिनी

एवं होमानन्तरं गर्भन्यासं कुर्यादित्याह - हृत्वेति। इष्टकागर्तगतम् इष्टकानां मध्यस्थगर्तगतं मृद्धान्यादिकं हृत्वा त्यक्त्वा। संशोध्य मार्जनादिकं कृत्वा। गव्यादिसमाप्लुते गव्याष्टगन्धजलादिभिश्चाप्लुते। सविष्टरे विष्टरं निधायात्राभ्यर्चितयोगपीठे निजां शक्तिं समावाह्य यजेत।।१२१।।

विवरणम्

गव्यादिसमाप्लुतेऽत्रेति गोमूत्रपञ्चगव्यगन्धोदकग्रहणम्। निजां शक्तिं समावाह्येति। वक्ष्यति हि - श्रीबीजेन प्रकृतिमभिवाह्याजितेऽन्येषु शक्त्येति। यद्वा, विष्णौ श्रियं शिवे गौरीं स्कन्दे देवसेनामित्याद्यभिप्रायमेतत्।।१२१।।

प्राज्ञाज्ञातः पिधानोत्तरमखिलजगद्गर्भि तद् गर्भपात्रं
तिष्ठन् कृत्वाञ्जलौ तत्तदणुशतजपं मन्त्रवित् संविधाय।
गर्भीयन्तीं जगन्मण्डलमखिलमनुध्याय शक्तिं स्वयं त-
द्गर्भाकारेऽत्र गर्ते न्यसतु निशि शनैः स्वोक्तमन्त्रप्रजापी।।१२२।।

सर्वभूतधरे! कान्ते! इति सर्वत्र तन्मनुः।
सर्वभूतालये! भद्रे! इति स्कन्दप्रभेशयोः।।१२३।।

Shripuram Publications
www.shripuram.org

सर्वभूतधरे! कान्ते! पर्वतस्तनमण्डिते!।
समुद्रपरिधाने! त्वं देवि! गर्भं समाश्रय।।१२४।।

सर्वभूतालये! भद्रे! सागराम्बरभूषिते!।
उत्तुङ्गाद्रिस्तनभरे! देवि! गर्भं समाश्रय।।१२५।।

विमर्शिनी

प्राज्ञाज्ञातः प्राज्ञैः विद्वद्भिराज्ञातः, विदुषां ब्राह्मणानां दानं कृत्वा तैः कृतं स्वस्तिकवचनं परिगृह्येत्यर्थः। पिधानोत्तरं पिधानेनोपर्याच्छादितम्। अखिलजगद्गर्भि अखिलजगत् तदन्तर्गतं स्मरन्। तत् प्रस्तुतं गर्भपात्रम् अञ्जलौ कृत्वा तिष्ठन् मन्त्रवित्। तत्तदणुशतजपं तत्तन्मूलमन्त्रमष्टोत्तरशतजपं संविधाय। शक्तिं स्वयं सर्वकारणभूतां स्वयं शक्तिम्। अखिलं जगन्मण्डलं गर्भीयन्तीमात्मनो गर्भत्वेन काङ्क्षमाणाम् अनुध्याय। तद्गर्भाकारे तस्या गर्भाधानस्थाने गर्तेऽत्र। शनैः स्वोक्तमन्त्रप्रजापी स्वस्वोक्तमन्त्रं जपन् निशि निशायामेव न्यसतु।।१२२।।

स्वोक्तमन्त्रप्रजापीत्यत्र को मन्त्र इत्याकाङ्क्षायामाह - सर्वभूतेत्यादिना। सर्वत्र सर्वदेवेषु। सर्वभूतधरे कान्ते इतीति इत्यादीत्यर्थः। तन्मनुः गर्भन्यासमन्त्रः। स्कन्दप्रभेशयोः सर्वभूतालये भद्रे इति। इतीति पूर्ववद् व्याख्येयम्।।१२३।।

तौ मन्त्रौ पठति - सर्वभूतधर इत्यादिना।।१२४, १२५।।

विवरणम्

प्राज्ञाज्ञात इति। प्राज्ञैर्हिरण्य[१]दानादिभिरनुज्ञातः। यद्वा प्राज्ञैरप्यज्ञातः। सर्वान् दूरतो विसृज्य रहो गर्भनिधानं कार्यमिति। अथवा प्राज्ञा वाद्यविदः तेषामाज्ञा च वाद्यध्वननमेव,तत इति। पिधानोत्तरमिति। तदा स्वपिधानविहितम्। अखिलजगद्गर्भीति। सकलजगत्सारवस्तूनां तस्मिन् निहितत्वात् सकलजगदण्डसूक्ष्मदशाया गर्भरूपत्वाद् वैराजविग्रहरूपस्य प्रासादमूर्तेस्तत्समुत्पत्त्यभिधानाच्चैवमुक्तम्। मन्त्रविदिति कवचेन पिधानमुक्तम्। तथा विष्णावष्टाक्षरद्वादशाक्षरजपादिकं चोक्तम्। गर्भीयन्तीमिति। गर्भमात्मन इच्छन्तीम्। अखिलजगन्मण्डलमिति। यत् प्रासादपूरुषतया परिणामिनीति वक्ष्यमाणत्वादिदमवसीयते। सकलभुवनात्मा विराडेवात्रोत्पादनीयः। स एव प्रासादमूर्तिरूपेण परिमितो

१. 'ण्या'

Shripuram Publications
www.shripuram.org
www.shripuram.org

भवतीति। बिम्बवच्चैतदवगन्तव्यम्। यद्वक्ष्यति - तदेतदण्डं प्रणवेन बिम्बमिति। अभिध्यायेति। पृथिवीं ब्रह्माण्डरूपिणीं तद्गर्भकामामादिशक्तिं च ध्यात्वेत्यभिप्रायः। तद्गर्भाकार इति। तस्या आदिशक्तेर्मूलप्रकृतेर्गर्भाशयाकारे। इह गर्भं समाश्रयेति। अयमपि गर्भशब्द एतदभिप्राय एवेत्यर्थलभ्यम्।।१२२-१२५।।

प्रासादपूरुषतया परिणामिनीह
मूलेन देवमभिवाह्य समर्च्य गर्भे।
किञ्चिन्निवेद्य परितोष्य सुरक्ष्य तक्ष्णा
प्रासादमारचयतां सहमन्त्रबिम्बम्।।१२६।।

विमर्शिनी

प्रासादपूरुषतया प्रासादपुरुषत्वेन। परिणामिनि परिणाममाधास्यमाने। इह अस्मिन् गर्भे। मूलेन देवमभिवाह्य समर्च्य किञ्चिन्निवेद्य परितोष्य सुरक्ष्य। तक्ष्णा शिल्पिना। सहमन्त्रबिम्बं मन्त्रमूर्त्या[१] प्रतिमया सहितं प्रासादम्। आरचयतां कारयेत्। सहमन्त्रबिम्बमित्यनेन बहुवेरे प्रासादेन सह मन्त्रबिम्बरचना सूचिता।।१२६।।

विवरणम्

प्रासादपूरुषतया परिणामिनीहेति। तदीयजीवरूपेण तत्र देवसन्निधापनमिति सूचितम्। सुरक्ष्येति तालत्रयादिकं लौकिकपुरुषै रक्षाकरणं चोक्तमिति। प्रासादमारचयतां सहमन्त्रबिम्बमिति प्रासादबिम्बकरणप्रस्तावः। किं च समनन्तरमेव प्रासादरचनमारब्धव्य-मित्यपि सूचितम्। तदुक्तम् - प्रासादप्रारम्भकाले गर्भाधानं कुर्यादिति।।१२६।।

आलिख्य मण्डलमिहाहितसन्निधानं
मूलेन देवमभिपूज्य[२] चरुं निवेद्य।
तद्वामतोऽस्त्रमपि तत्सविधे निधाय[३]
शस्त्राणि चास्त्रमनुना प्रयजेता तक्ष्णाम्।।१२७।।

विमर्शिनी

एवं प्रासादकरणात् पूर्वगतं क्रियाकलापमुक्त्वा बिम्बरचनात् पूर्वगतं क्रियाकलापमाह

१. 'वरप्रा' ख. पाठः, २. 'वाह्य च', ३. 'वि' इति मूलकोशपाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

- आलिख्येति। कस्मिंश्चित् प्रदेशे मण्डलमालिख्य इह आहितसन्निधानं कृतावाहनं देवं मूलेनाभिपूज्य चरुं पायसं हविर्निवेद्य। तद्वामतः तस्य मण्डलस्य वामे अस्त्रमपि स्वास्त्रमन्त्रेणापि तथा सम्पूज्य। तत्सविधे पूजितास्त्रस्य समीपे। तक्ष्णां शस्त्राणि आयुधानि निधायास्त्रमनुना च तथा प्रयजेत।।१२७।।

विवरणम्

तत्र पूर्वं तावत् तदीयद्रव्यसम्पादनमभिधत्ते - आलिख्य मण्डलमिति। यद्यप्येतत् प्रासादबिम्बकरणशेषत्वाद् उत्तरपटले वक्तुमुचितं, किन्तु पूजादिसद्भावादिह पटलान्तेऽभिधानमिति ज्ञेयम्। स्वस्तिकमष्टदलं वालिख्य मण्डलमित्युक्तम्। अहितसन्निधानमिति। आहितं कृतपीठपूजादिपूर्वकमावाहनादि कृत्वेत्यर्थः। चरुमिति। पयोन्धसेति वक्ष्यमाणत्वात् पायसं निवेद्यमिति लभ्यते। तद्वामतोऽस्त्रमपीति। अपिशब्देनालिख्य मण्डलमित्यादिसर्वमनुकृष्यते। देववामभागे स्वस्तिकमालिख्य तत्र स्वस्वमस्त्रं पीठपूजापूर्वकमावाह्य पूजयेदित्यर्थः। तत्सन्निधाविति। तस्यास्त्रमूर्तेः सन्निधौ वामभाग एव स्थण्डिल इति भावः।।

निवेद्यशिष्टेन पयोन्धसाग्नौ
हुत्वाशयित्वा मुखजान् प्रसाद्य।
दध्यन्नमश्नातु गुरुः सकर्ता
तत्रार्चनीयः स्थपतिश्च तद्वत्।।१२८।।

विमर्शिनी

निवेद्यशिष्टेन पयोन्धसा पायसहविषाग्नौ हुत्वा। मुखजान् ब्राह्मणान्। आशयित्वा भोजयित्वा। तान् दानेन च प्रसाद्य देवस्य प्रसन्नपूजां कृत्वा। सकर्ता कर्त्रा सहितो गुरुः। दध्यन्नं दधिविशिष्टमन्नम् अश्नातु। तत्र कर्मणि स्थपतिः तक्षा च तद्वदर्चनीयः, तस्याप्यन्नदानादिना प्रसादं कुर्यादित्यर्थः।।१२८।।

विवरणम्

निवेद्यशिष्टेनेति पूजाहोमोऽयमवबोद्धव्यः। आशयित्वेति। भोजयित्वा तस्य पायसस्य एकं भागमित्यर्थाद् अवसेयम्। मुखजा ब्राह्मणाः। प्रसाद्येति। देवं अस्त्रदेवता ब्राह्मणांश्चेति ज्ञेयम्। ब्राह्मणादीनां तु गोहिरण्यदानादि प्रसादनसाधनम्। स्थपतिस्तक्षा।

Shripuram Publications
www.shripuram.org

तद्वदर्चनीय इति। पायसभोजनं वस्त्रालङ्कारैः प्रसादनमित्येतदुक्तम्।।१२८।।

रक्षामङ्गलपूर्वकं शुभनिमित्तर्क्षे शिलार्थं व्रजे-
न्मन्त्री शस्त्रिभिरन्वितः स्थपतिभिः कर्त्रापि चैन्द्र्यादिषु।
आसाद्याथ शिलाकरं सुमहितात्माणुं त्रिनेत्रादिकं
जप्त्वान्विष्य शिलां निजेष्टमनुबिम्बादिक्षमां कल्पयेत्।।१२९।।

विमर्शिनी

अथ मन्त्री। शस्त्रिभिः शस्त्रपाणिभिः स्थपतिभिः शिल्पिभिः। कर्त्राप्यान्वितो युक्तः। रक्षामङ्गलपूर्वकं रक्षां कृत्वा कनिक्रदादिमङ्गलानि जपन्। शुभनिमित्तर्क्षे शुभे निमित्ते शकुनादिके च शुभे मुहूर्ते च। शिलार्थं शिलां ग्रहीतुम् ऐन्द्र्यादिषु पूर्वादिषु दिक्षु। व्रजेद् गच्छेत्। अथ शिलाकरं शिलायाः क्षेत्रमासाद्य। सुमहितात्मा आत्मारा-धनादिकृत्। शिवे त्रिनेत्रादिकम् अन्येष्वपि स्वस्वयोग्यमणुं जप्त्वा शिलामन्विष्य निजेष्टमनुबिम्बादिक्षमां स्वस्येप्सितानां मन्त्रबिम्बपीठादीनां शक्तां शिलां कल्पयेत्।।१२९।।

विवरणम्

रक्षामङ्गलपूर्वकमिति। ऐन्द्र्यादिषु शिलार्थं व्रजेदिति सम्बन्धः। रक्षेह स्वास्त्रभावना तच्छतावर्तनमग्रतोऽर्घ्यहस्ताया विद्याराज्ञ्याः स्मरणं च। मङ्गलं कनिक्रदत्स्वस्त्यादिजपः, शङ्खध्वानं प्रदीपपूर्णकुम्भादि चेति। मन्त्रीति। प्रतिष्ठापनीयदेवतानुसन्धानमस्त्रेण दिग्विरेचनमप्युक्तम्। ऐन्द्र्यादिष्विति। प्राच्युदीच्यैशानी च दिगुक्ता। तदसम्भवे याम्यादयोऽपि ग्राह्याः। सुमहितात्मेति। स्नानाद्युपलक्षणम्। जप्त्वेति। जपन्नित्येवार्थः। निजेष्टमनुबिम्बादिक्षमामिति पीठशिलादिग्रहणम्।।१२९।।

त्रिनेत्राय च रुद्राय ध्वजाधिपतये नमः।
शिलां दर्शय देवेश! प्रसन्नो मे वृषध्वज!।।१३०।। इति।।

सिद्धाद्र्याकरसम्भवा वसुमतीमग्ना स्ववर्णोचिता
स्निग्धा शस्त्रसहा गभीरनिनदा दिश्याहिताग्रा शिला।
ग्राह्या बिम्बविधौ स्फुलिङ्गबहुलं तस्याः शिरोऽधो मुखं
यत्काष्ठाभिमुखी समुत्थितवती स्थाप्या च तद्दिङ्मुखी।।१३१।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

त्रिनेत्रमन्त्रं पठति - त्रिनेत्रायेत्यादिना।।१३०।।

शिलालक्षणमाह - सिद्धेति। बिम्बविधौ शिला ग्राह्या। सिद्धाद्र्याकरसम्भवा प्रसिद्धपर्वतस्थक्षेत्रे सम्भवो यस्याः सा। वसुमतीमग्ना भूम्यां तिरोहिता। स्ववर्णोचिता ब्राह्मणादिस्वस्ववर्णस्योचिता शोभनैरकाराद्यक्षरैरुपलक्षिता च। स्निग्धा निबिडा न तु कर्कशा। शस्त्रसहा शस्त्रप्रहारक्षमा। गभीरनिनदा गाम्भीर्यवन्नादयुक्ता। दिश्याहिताग्रा दिग्गताग्रभागा च। तस्याः शिलायाः स्फुलिङ्गबहुलं स्फुलिङ्गबाहुल्यं यस्मिन् भागे तच्छिरोऽवगन्तव्यम्। अधो मुखम् अधोभागं मुखमवगन्तव्यम्। समुत्थितवती यत्काष्ठाभिमुखी तस्यामुत्थितायां यस्यां दिशि मुखं भवति तद्दिङ्मुखी स्थाप्या च।।१३१।।

विवरणम्

शिलालक्षणमपि दिङ्मात्रेणाचष्टे - सिद्धाद्र्याकरसम्भवेति। लोकसिद्धेषु अद्रिष्वाकरेषु च सम्भविनीत्यर्थः। सह्यमलयादयो लोके प्रसिद्धाः पुण्यगिरयः। शिलाकरास्तु शिलाक्षयादयः। वसुमतीमग्नेति। भूम्यन्तर्गता। सिद्धाद्याकरेषु आहितापि ग्राह्या। तदन्यत्र भूमिमात्रे तु भुम्यन्तर्हिता ग्राह्येति भावः। स्ववर्णोचितेति। तदुक्तम् -

"श्वेताब्जाभा मृगे ग्राह्या सौम्या विप्रस्य सा शिला।
ऐन्द्री रक्ता कुलस्थाभा ज्येष्ठायां क्षत्रियस्य तु।।
फल्गुन्यां भगदेवत्या पीता वा हरिता विशाम्।
कृष्णा मुद्गनिभाश्विन्यां शूद्रस्यैवाश्विदेवता।।"

इति। अत्रानुलोमा अपि ग्राह्याः। प्रतिलोमास्सङ्कीर्णाश्च न ग्राह्याः। वर्णानवघृतौ पुरोक्तपरीक्षया स्वप्नदर्शनेन विनिर्णय इति। शस्त्रसहेति। शस्त्रस्पर्शे तदनुकूलैव न तु तदा स्फुटति जीर्यति वेत्यर्थः। दिश्याहिताग्रेति। स्फुलिङ्गबहुलमित्येतदग्रलक्षणम्। दिशि ऐन्द्र्यादौ न तु विदिशि। आहितमग्रं यस्याः सा तथोक्ता। बिम्बविधाविति पीठांद्युपलक्षणम्। यद्वा, स्ववर्णोचितेत्येतद् बिम्बविधावेव आवश्यकमिति भावः। स्फुलिङ्गबहुलमिति। तदुक्तम् -

"ध्वनिर्घण्टानिभा यत्र स्फुलिङ्गाश्छेदने तथा।
दृश्यन्ते तच्छिरस्तस्याः पृष्ठमूर्ध्वमधो मुखम्।।"

Shripuram Publications
www.shripuram.org

इति। शिरोविज्ञानेऽर्थात्तद्विपरीतदिशि पादप्रदेशो विज्ञायते। यत्काष्ठाभिमुखीति। यद्दिगभिमुखी। समुत्थितवतीति। बिम्बोचितायाः शिलायाः समन्ततो भित्त्वा समुत्थाप्यमानाया यद्दिक्सम्मुखं मुखं भवतीत्यर्थः।।१३१।।

दुष्टोद्देशसमुद्भवान्यपरिशिष्टा दुर्ग्रहाद्याश्रिता
वाताग्न्यर्ककराहतातिविपुला बाला च वृद्धासती।
दूरेखाक्षरगर्भमण्डलयुता रूक्षस्वरा जर्जरा
दुःस्पर्शापदिशं निवेशितशिरोदेशा च वर्ज्या शिला।।१३२।।

विमर्शिनी

वर्ज्यां शिलामाह - दुष्टोद्देशेति। दुष्टोद्देशसमुद्भवा दुर्देशजाता। अन्यपरिशिष्टा अन्यत्र गृहीताया अवशेषिता। दुर्ग्रहाद्याश्रिता वेतालादिग्रहैराश्रिता। वाताग्न्यर्ककराहता वायुनाग्निनादित्यकरैर्वा तप्ता। अतिविपुला उद्धर्तुमश(क्ता?क्या)। बाला दुर्बला। वृद्धासती* च जीर्णावयवा च। दूरेखाक्षरगर्भमण्डलयुता शास्त्रेषु निन्दिताभी रेखाभिरक्षरैश्च गर्भैरन्तश्छिद्रैस्तथा निन्दितैर्मण्डलैश्च युता। रूक्षस्वरा परुषस्वरा। जर्जरा शस्त्रे किञ्चिन्मात्रस्पर्शे शीर्णा। दुस्पर्शा परुषा। अपदिशं निवेशितशिरोदेशा च दिग्भ्योऽन्यत्र निवेशितशिरोभागा च शिला वर्ज्या स्यात्।।१३२।।

विवरणम्

अथ पादुकादिविषये शिलां दुष्टां वदन् शिष्टां ग्राह्यां दर्शयति - दुष्टोद्देशसमुद्भवेति। दुष्टोद्देशाः प्रेतवनादयः। अन्यपरिशिष्टेति। अन्यत्र विनियुक्तशेषा शिला। दुर्ग्रहाद्याश्रितेति। ब्रह्मराक्षसादयो दुर्ग्रहाः। वाताग्न्यर्ककराहतेति। सदा वातेन अग्निनातपेन वा स्पर्शतो दूषिता। बाला च वृद्धासतीति। तदुक्तम् -

“बाला शस्त्रासहा मृद्वी पिच्छिला पल्लवास्थिरा।
सा हि मण्डूकखण्डा च वृद्धा रूक्षातिजर्जरा।।
बहुवर्णातिनीला च धूम्रा च स्थूलरोमिका।
हीनस्वरा च निन्द्याङ्गी सोष्णा चण्डालिका स्मृता।।”

इति। चण्डालिकैवासती। दूरेखाक्षरगर्भमण्डलयुतेति। दुरित्येतद् रेखाक्षरपदाभ्यां

* असतीशब्दस्य व्याख्यात्र न दृश्यते। चण्डालिकैवासतीति विवरणे दर्शनात् वृद्धा सतीति मुद्रितपाठो नादृतः।

www.shripuram.org

सम्बध्यते। दूरेखा वक्रादिका दुरक्षराणि रेखादीनि। तदुक्तम् -

"वक्रस्थूलकृशा रूक्षाश्छिन्नाग्राश्च[1] न शोभनाः।
सङ्कीर्णा बहुवर्णाश्च यस्यां नेष्टा च सा शिला।।"

इति। रोदोभिः पुष्टिशान्तयः या योगवाहेषूच्चाट(?) इत्यादि।

सगर्भोत्पाट्यमाना या भिद्यते शिथिलध्वनिः।
"मण्डलादियुतोष्णा वा विवर्णा वापि तां त्यजेत्।" इति। दुस्पर्शेति।

कण्टकितवदवस्थानादेतत्। अपदिशं निवेशितशिरोदेशेति। अदिक्ष्वाहिताग्रेत्यर्थः। इहैतदर्थादवसेयम्। शिष्टदेशोद्भवासु रेखाक्षरयुता ग्राह्येत्यादि।।१३२।।

गुर्वी धीररवा स्फुलिङ्गबहुला न्यग्रोधबोधिच्छद-
प्रख्या बिम्बविधौ विशालबहुला ग्राह्या शिला पौरुषी।
रम्भापत्रनिभा नचातिबहला स्निग्धस्वरा शीतला
स्त्रैणी पीठविधौ द्विलक्ष्मभिदुरा क्लैबी पदाब्जार्पणे।।१३३।।

विमर्शिनी

तत्र बिम्बविधौ पौरुषी शिला ग्राह्या। सा तु गुर्वी गुरुत्वयुक्ता। धीररवा गम्भीरनादा। स्फुलिङ्गबहुला बहुस्फुलिङ्गयुक्ता। न्यग्रोधबोधिच्छदप्रख्या वटपत्रवद् वा अश्वत्थपत्रवद् वाकारयुक्ता। विशालबहुलातिविस्तारा च। पीठविधौ स्त्रैणी स्त्रीशिला ग्राह्या। सा तु रम्भापत्रनिभा कदलीपत्राकारा। न चातिबहला अतिघनरहिता। स्निग्ध्नस्वरा माधुर्यस्वरयुक्ता। शीतला शैत्ययुक्ता च। पदाब्जार्पणे पीठस्याधोगतनपुंसकशिलार्थम्। क्लैबी नपुंसकलक्षणयुता शिला ग्राह्या। सा तु द्विलक्ष्मभिदुरा पुंसः स्त्रियाश्च लक्षणभेदिता च।।१३३।।

विवरणम्

पुरुषशिलादिलक्षणमाह - गुर्वीति। पौरुषी शिला बिम्बविधौ ग्राह्येत्यन्वयः। न्यग्रोधबोधिच्छदप्रख्या वटाश्वत्थपत्रानुकारा। विशालबहला विस्तृता घना च। स्त्रैणी पीठविधौ ग्राह्येति योज्यम्। क्लैबी पदाब्जार्पणे इति। नपुंसकरूपा शिला पच्छिलाविधौ ग्राह्येत्यर्थः।।१३३।।

---

१. 'भिन्नाङ्गाश्च' क. पाठः

Shripuram Publications
www.shripuram.org

लब्धायां शुभलक्ष्मलक्षितशिलायां शोधयित्वाञ्जसा
सम्पाद्य ध्वजपट्टिकादिपरिवीतं मण्डपं मूलतः।
मध्ये दिक्षु दिगीश्वरानपि यजेत् सर्वेष्वथो बीजमु-
ख्यासिभ्यामपि मृत्युजिन्मनुवरेणेशे स्वमूलान्ततः।।१३४।।

विमर्शिनी

शिलापरिग्रहमाह - लब्धायामिति। शुभलक्ष्मलक्षितशिलायां शुभैर्लक्षणैर्युक्तायां शिलायां लब्धायां सत्यां दर्भमृदादिभिरञ्जसा शोधयित्वा। ध्वजपट्टिकादिपरिवीतं ध्वजैस्तत्पताकाभिश्च परिवृतं मण्डपं सम्पाद्य सर्वेषु देवेषु मध्ये मूलतो दिक्षु दिगीश्वरानिन्द्रादीनपि यजेत्। अथो ईशे स्वमूलान्ततः स्वमूलयजनानन्तरम्। बीजमुख्यासिभ्यां द्वादशपटले वक्ष्यमाणेन बीजमुख्यमन्त्रेण क्षुरिकया च। मृत्युजिन्मनुवरेण मृत्युञ्जयाभिधानेनापि यजेत्।।१३४।।

विवरणम्

शिलापरिग्रहक्लृप्तिमाह - लब्धायामिति। शिलान्वेषणस्यैव प्रकृतत्वादिदानीं लब्धायामित्यभिधानम्। भूम्यन्तर्हितायां तु शिलायां खात्वा लब्धायामित्यपि द्रष्टव्यम्। अञ्जसा शोधयित्वेति दर्भादिभिर्घर्षणपूर्वकं बहुजलैर्युक्तितः शोधनमुक्तम्। गन्धजलेनापि क्षालनं, प्राक् पूजितेन कलशेन अभिषेचनं, पञ्चगव्येन पवमानीभिः प्रोक्षणमप्युक्तम्। मूलतो मध्ये यजेदिति। शिलायामपि यत्र प्रतिमा गृह्यते स एव प्रदेशो मध्य इत्यभिप्रेतः। तत्र देवं विधिवत् सम्पूज्य पायसं निवेदयेदिति भावः। दिक्षु दिगीश्वरानपि यजेदिति। स्थण्डिलेषु स्वस्तिकादिषु कलशेषु वेति भावः। शिवे त्वधिकमाह - अथो* बीजमुख्यासिभ्यामिति। असिः क्षुरिका। एतन्मन्त्रोद्धारस्तु कर्मशेष एव। कल्पविदिति देवसन्निधावेव बीजमुख्यादिपूजा तद्बहिरङ्गाद्यावरणपूजेत्युक्तम्।।१३४।।

तत्पश्चिमेऽस्त्रमनुनाष्टशताज्यहोमं
कृत्वार्घ्यं सर्पिरधिवास्य च शस्त्रजातम्।
तद्देवताव्युदसनाय सभूतकूर-
मों देवताभ्य इति दिक्षु बलिं किरेच्च।।१३५।।

---

* 'बीजमुख्यासिभ्यामपि कल्पवित् त्रिनयने मृत्युञ्जयेनापि तद्' इति विवरणपाठः

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ सर्वेषु तत्पश्चिमे अस्त्रमनुनाष्टशताज्यहोमं कृत्वा सम्पातसर्पिराप्य्र संस्पृश्य। शस्त्रजातं शस्त्रसमूहम् अधिवास्य। तद्देवताव्युदसनाय तत्रत्यानां देवतानामपासनार्थम्। सभूतकूरं भूतकूरैः सहितं बलिं दिक्षु ओं देवताभ्य इत्यादिना पूर्वोक्तेन मन्त्रेण। किरेत् विक्षिपेत्।।१३५।।

विवरणम्

शस्त्रजातं चाधिवास्येत्यन्वयः। देवस्याधिवासनं चकारेण सूचितम्। यदुक्तं - 'इष्ट्वाहतवस्त्रेण दर्भैरप्याच्छाद्ये'ति। शस्त्राणामपि वस्त्रेणाच्छाद्याधिवासः। तद्देवता-व्युदसनायेति। तद्गतानां भूतादीनां वनदेवतानां चेत्यर्थः। शिलाशोधनतोऽपि प्रागेव वेदानीं वा बलिहरणमेतत् स्यात्। बलिहरणान्तरं वोत्तरेद्युर्वास्त्रेण तद्देवतापासनमपि व्युदसनग्रहणेनोक्तम्। ओं देवताभ्य इति। भूपरिग्रह उक्त एव मन्त्रः। प्रणवेन सहोपादानं प्रदर्शनार्थम्। मया सम्पूजितैरित्यादिमन्त्रेष्वपि प्रणव आदितः स्यादिति।।१३५।।

देवाग्रतो जपतु निश्यधिशय्य दर्भ-
शय्यां नमः सकललोकमनुं त्रिधाम्नि।
शम्भौ नमः शमितिमन्त्रयुजार्थयित्वा
स्वप्नार्थमों हिलिहिलीति मनुं जपेच्च।।१३६।।

नमः सकललोकाय विष्णवे प्रभविष्णवे।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः।।१३७।।

नमः शम्भो! त्रिनेत्राय रुद्राय वरदाय च।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः।।१३८।।

आचक्ष्व देव! देवेश! प्रपन्नोऽस्मि तवान्तिकम्।
स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै।।१३९।।

ओं हिलिहिलि शूलपाणये स्वाहा। इति।

Shripuram Publications
www.shripuram.org

विमर्शिनी

पुनर्निशि देवाग्रतः। दर्भशय्यां दर्भमयीं शय्याम्। अधिशय्याश्रित्य। त्रिधाम्नि विष्णौ। नमस्सकललोकमनुं नमः सकललोक इत्यादिमनुं मन्त्रं जपतु। शम्भौ शिवे। नमश्शमितिमन्त्रयुजा नमः शम्भो इत्यादिमन्त्रद्वयेन अर्थयित्वा प्रार्थ्य। स्वप्नार्थं स्वप्नदर्शनार्थम्। ओं हिलि हिलि इत्यादिमनुं जपेच्च। अन्येषु स्वस्वमूलमन्त्रं जपेत्, ततः स्वप्नं पश्येत्।।१३६-१३९।।

विवरणम्

निशि देवाग्रतो दर्भशय्यामधिशय्य जपत्वित्यन्वयः। निशीत्यनेन प्रागुक्तं सर्वं दिवेत्यप्युक्तम्। दर्भशय्यायां शयित्वेत्यर्थः।।१३६।।

स्थित्वैवार्थनेष्यते। नमः सकललोकायेति, नमश्शम्भो त्रिनेत्रायेति च स्वप्नमाणवको नाम मन्त्रः। हरिहरादिषु कथमिति। तेष्वपि यथास्वं विष्णुं शिवं वापि सम्पूज्य तदग्रतो यथोक्तं[1] स्वप्नं कार्यमिति ज्ञेयम्।।१३७-१३९।।

दुःस्वप्नेऽस्त्रं[2]शताज्यहोमकृदथ प्रातः समभ्यर्च्य ता-
मुद्बुध्यस्वंमनुं जपन् वदनपादाद्यङ्गकेष्वङ्कयेत्।
तक्ष्णा तां सहपीठपाददृषदं प्रोद्धार्य कृत्वा रथे
नीत्वात्रोत्तरक्लृप्तशिल्पि[3]निलयं बिम्बादिकं कारयेत्।।१४०।।

विमर्शिनी

पुनः प्रातर्यदि दुःस्वप्ने दृष्टे। अस्त्रशताज्यहोमकृद् अस्त्रमन्त्रेणाष्टशतमाज्यं हुत्वा। मूलमन्त्रेण समभ्यर्च्य। तां शिलाम्। वदनपादाद्यङ्गकेषु वदनपादादिसर्वाङ्गेषु। उद्बुध्यस्वाग्न इति मनुं जपन् अङ्कयेत् चिह्नं कुर्यात्। पुनस्तक्ष्णा सहपीठपाददृषदं पीठशिलापादशिलाभ्यां सहितां तां शिलां प्रोद्धार्य प्रकर्षेणोद्धरणं कारयित्वा। रथे रथस्थानीये शकटे वा। कृत्वा स्थापयित्वा। अत्र देवालयसमीपे। उत्तरक्लृप्तशिल्पिनिलयं देवालयस्योत्तरभागे कल्पितं शिल्पिनो गृहं नीत्वा। बिम्बादिकं बिम्बपीठादिकं सर्वं कारयेत्।।१४०।।

---

१. 'क्तं दर्भस्व', २. 'ष्ट', ३. 'ल्प' क. पाठः

Shripuram Publications
www.shripuram.org

विवरणम्

दुःस्वप्न इति। सुस्वप्ने तु सा ग्राह्यैव। यदुक्तम् -

"ज्वलन्तीं वा शिलां पश्येत् स्वप्ने स्वां देवतां तु वा।
अन्यद्वा शोभनं ग्राह्या सा शिला"।।इति।

अथ प्रातरिति। प्रातः स्नानादि कृत्वा तस्यां शिलायां प्राग्वन्मूलमन्त्रेण देवं पूजयेत्। उद्बुध्यस्वमनुं जपन्निति। सर्वाङ्कनेष्वयमेव मन्त्र इति भावः। वदनपादाद्यङ्गकेष्विति। यदुक्तम् - 'स्फुलिङ्गबहुलं तस्याः शिर' इत्यादि। अङ्कयेदिति। यदुक्तम् - 'हेमसूव्यष्ठालाभ्यां तु छिन्द्यात् प्रथममस्त्रतः'। इति। सकृदुद्बुध्यस्वेत्युक्त्वा नरस्त्रमुच्चारणीयमिति ज्ञेयम्। पीठपच्छिलयोरस्त्रेणैवाङ्कनम्। नीत्वात्रेति। यत्र प्रासादादि निर्मेयं तत्र, आयतनमूमावित्यर्थः।।१४०।।

इति तन्त्रसमुच्चयविवरणे
प्रथमः पटलः।

**इति तन्त्रसमुच्चयेऽर्चकोर्वी-
ग्रहवास्त्विष्टिनिधीष्टकाक्रियाढ्यः।
सहगर्भशिलाहृतिप्रकारः
प्रथमोऽयं पटलः प्रगुम्भितोऽभूत्।।१४१।।**

अथ ग्रन्थकृत् प्रथमे पटले प्रकाशीकृतानर्थान् स्मारयति - इतीति। एवं तन्त्रसमुच्चये तन्त्रसमुच्चयाख्ये ग्रन्थे। अयं प्रथमः पटलः परिच्छेदविशेषः। प्रगुम्भितः विरचितोऽभूत्। कथंभूतः, अर्चकोर्वीग्रहवास्त्विष्टिनिधीष्टकाक्रियाढ्यः अर्चक आचार्यः उर्वी भूमिः तयोर्ग्र(हणं?हः) परिग्रहणं तेन वास्त्विष्टिर्वास्तुयागः तेन च निधिः निधिकलशस्थापनं तेन च इष्टकाक्रिया इष्टकानिधानं तेन चाढ्यः परिपूर्णः। सहगर्भशिलाहृतिप्रकारः गर्भस्य गर्भाधानस्य शिलाहृतेः शिलाया आहरणस्य च यौ प्रकारौ ताभ्यां च सहित एष पटलः।।१४१।।

इति तन्त्रसमुच्चयविमर्शिन्यां
प्रथमः पटलः।

Shripuram Publications
www.shripuram.org